16

	Field
Vayu Purān	Title
	Author
	Editor
	Year, Vols.
	Publisher
16	Remarks

॥६०॥ ॐ नमः श्रीसर्वज्ञाय॥ ॥ जयति तटद्वयपतीर्थैः। प्रक्षालितसकललोक
दुरितौघा॥ देवमुनिमनुजवंद्या हरतु समस्तां नर्मदा दुरितं॥१॥ नाशयतु दुरितम
खिलं नूतं श्रुतं च कालमंस्मृतं॥ सकलपवित्रितवसुधा पुराणडलावंदिता रेवा॥२॥
बालार्कस्वच्छनालं विबुधरिपुशिरश्छेदनाडुक्तदिग्धं। धाराप्राद्भूतक नानलव
क्ष्लशिखाजलजमाहुर्निरीक्ष्यं। निर्दग्धमत्त्रोप्रदिन्यं भ्रमति सुरवधूसंचयैश्चर्चमा
नं। पायाद्वक्रं मुरारेर्विभ्रमनृपगणो वैद्यमानं सदैव॥३॥ नारायणं नमस्कृत्य। नरं
चैव नरोत्तमं। देवीं सरस्वतीं चैव। ततो जयमुदीरयेत्॥४ नैमिषे पुण्यनिलये। ना
नाऋषिनिषेविते। शौनकः सत्रमासीनः। सूतं पप्रच्छ विस्तरात्॥ पमन्यद्धर्मनि
पुणं। त्वयि सूत समर्पितं॥ पुराणं मत कथावक्ता व्यासशिष्यः त्वमेव हि॥५ इदं अतस्त्वां प
रिपृच्छामि। धर्मं तीर्थाश्रयं कथं॥ बहूनि संति तीर्थानि। बहुशः संश्रुतानि च॥६ श्रुता

वा। त्वर्लोकस्मिन्न प्रख्यात॥२६ अद्यापि देवलोके तच्छतकोटिप्रविस्तरं॥ तदर्थो
ऽत्र चतुर्लक्षसंक्षेपेण निवेशितः॥ पुराणानि दशाष्टौ च सांप्रतं तदिहोच्यते॥
नामतस्तानि वक्ष्यामि। शृणुष्वं ऋषिसत्तम॥२७ सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च
। वंशानुचरितं चैव। पुराणं पंचलक्षणं॥२८ ब्रह्मपुराणं तत्राद्यं। संहितायां विस्तृषि
तं॥ श्लोकानां दशसाहस्रं। नानापुण्यकथायुतं॥२९ पाद्मं च पंचपंचाशत्सहस्राणि।
निगद्यते॥ तृतीयं वैष्णवं नाम। त्रयोविंशतिसंख्यया॥३१ चतुर्थं वायुना प्रोक्तं। वाय
वीयमिति स्मृतं। शिवभक्तिसमायोगात् शैवं तद्वापराख्यया॥३२ चतुर्विंशतिसंख्यातं।
सहस्राणि तु शौनकं॥ चतुर्भिः पर्वभिः प्रोक्तं। भविष्यं पंचमं तथा॥३३ चतुर्दशस
हस्राणि। तथा पंचशतानि तत्॥ मार्कंडेनव साहस्रं षष्ठं तत्परिकीर्तितं॥३४ आग्ने
यं सप्तमं प्रोक्तं। सहस्राणि तु षोडश॥ अष्टमं नारदीयं च प्रोक्तं विपंचविंशतिः। ३५

भागवतं नाम
तथा भागद्वयविरूपितं ॥ तदष्टादशसाहस्रं । प्रोच्यते ग्रंथसंख्यया ॥ ३६ दशमं ब्र
ह्मवैवर्त्तं तावत्संख्यमिहोच्यते ॥ लिंगमेकादशं ज्ञेयं । तच्चैकादशसंख्यया ॥ ३७ ॥
भागद्वयं विरचितं तत्तु लिंगं ऋषिपुंगव ॥ चतुर्विंशतिसाहस्रं वाराहं द्वादशं विदुः ॥ ३
८ विलक्षमष्टलिः खंडैः स्कांदं भागवतां वर ॥ चतुराशीतिसाहस्रं संख्यया तन्निरूपितं
॥ ३९ ततस्तु वामनं नाम तच्चतुर्द्दशमं स्मृतं ॥ संख्यया दशसाहस्रं । प्रोक्तं कल्पांतपु
रा ॥ ४० कौर्म्मं पंचदशं प्राहुर्भागद्वयविरूपितं ॥ दशसप्तसहस्राणि । पुरासंख्यप
तः कालो ॥ ४१ मात्स्यं मत्स्येन यत्प्रोक्तं ॥ मनवे षोडशं क्रमात् । तच्चतुर्द्दशसाहस्रं
संख्यया यज्ञतां वर ॥ ४२ गारुडं सप्तदशमं स्मृतं चैकोनविंशतिः ॥ अष्टादशं तु ब्र
ह्मांडं । भागद्वयनिरूपितं ॥ ४३ तच्च द्वादशसाहस्रं शतद्वयसमन्वितं ॥ तथैवोपपु
राणानि । प्रोक्तानि विधसा ॥ ४४ इदं ब्रह्मपुराणस्य । खिलं सौरमनुत्तमं । संहिताद्वयसं

२

युक्तं पुण्यं शिवकथाश्रयं ॥ ४५ आद्या सनत्कुमारोक्ता द्वितीया सूर्य्यभाषिता । सनत्कुमार
नाम्ना पि तद्विख्यातं महामुने ॥ ४६ द्वितीयं नारसिंहं च पुराणं पद्मसंज्ञितं ॥ नंदापु
राणं च तथा तृतीयं । विष्णवाचमतं ॥ ४७ चतुर्थं शिवधर्माख्यं पुराणं वायुसंज्ञितं ॥ दौ
र्वासं पंचमं चस्मृतं भागवतमदः ॥ ४८ लविष्णुनारदोक्तं च । सूरिभिः कथ्यते पुरा । का
पिलं मानवं चैव तथैवोशनसेरितं ॥ ४९ ब्रह्मांडं वारुणं चाथ कालिकाह्वयमेव च ॥ मा
हेश्वरं तथा सांबं सौरं सर्वार्थसंचयं ॥ ५० पराशरं भागवतं । कौर्म्मं चाष्टादशं क्रमात् ॥ ए
तान्युपपुराणानि । मया प्रोक्तानि यथाक्रमं ॥ ५१ पुराणसंहितामेतां यः पठेद्वा शृणोति च
। सानंतपुण्यभागी स्यान्मृतो ब्रह्मपुरं व्रजेत् ॥ ५२ इति वायुपुराणे श्रीरेवाखंडे पुरा
णसंहितानामाध्यायः ॥ प्रथमः ॥ १ ॥ छ ॥ सूत उवाच ॥ ॥ पुराणं यन्मया प्रोक्तं हि चतुर्थं वा
युसंज्ञितं ॥ चतुर्विंशतिसाहस्रं । शिवमाहात्म्यसंयुतं ॥ महिमानं शिवस्याहो । द्वार्थपा

रामरक्षगः॥ अपराह्णे उत्तरायामाहात्म्यमतुलं मुने॥ पुराणान्युत्तमं श्राद्धः पुराणां वा-
युनाहितं॥ यस्य श्रवणमात्रेण शिवलोकमवाप्नुयात्॥ यथा शिवस्तथा शैवं पुराणं
वायुनोदितं॥ शिवभक्तिसमायोगान्नामद्वयविभूषितं॥ नर्मदायास्तु माहात्म्यं त-
स्मिन्नाह्निपा यथाऽब्रवीत्॥ सप्तषष्टिसहस्राणि तथा सप्तशतानि च॥ सप्तषष्टिस्तथा
कोट्यो लक्षाण्यपि द्विसप्त च। दिवि भुव्यंतरिक्षे च। तीर्थानां वायुरब्रवीत्॥ तन्मध्ये
नर्मदातीर्थसमासान् इह शौनक॥ तानहं संप्रवक्ष्यामि यत्त्वया परिपृच्छितं॥ विस्त-
रं नर्मदायास्तु तीर्थानां मुनिसत्तम॥ कोन्यः शक्नोति विवक्तुं स्नात ब्रह्मा गामीश्वरं॥ एत-
मेव पुराप्रश्नं पृष्टवान् जनमेजयः॥ वैशंपायनसंज्ञं तु शिष्यं द्वैपायनस्य ह॥ रेवा
तीर्थाश्रितं पुण्यं तत्तद्वक्ष्यामि शौनक॥ पुरा पारिक्षितो राजा यज्ञदीक्षामुदीक्षितः॥
संस्थिते तु हविर्द्रव्ये वर्तमानेषु कर्मसु॥ आसीनेषु द्विजाग्र्येषु हूयमानेष्वताग्ने॥

५

वर्त्तमानासु सर्वत्र तथा धर्मकथासु च॥ श्रूयमाणे तथाऽऽख्याने जनेरुक्के वह्निशिं॥ य-
ज्ञस्त्यमो कलपत दीयतां भुज्यतामिति॥ विविधंश्रुविनादान्ते ऋत्विजा पुविनादि-
षु॥ एवं विधे वर्त्तमाने यज्ञे स्वर्गसदः समे। वैशंपायनमासीनं पप्रच्छ जनमेजयः।
।जनमेजय उवाच॥ द्वैपायनप्रसादेन ज्ञानवानिति मे मतः॥ वैशंपायन तस्मात्त्वां-
पृच्छामि ऋषिसन्निधौ॥ ब्रूहि सर्वं पुरा वृत्तं पितॄणां तीर्थसेवनं। चिरं नानाविधान्-
क्लेशान् प्राप्तास्त इति मे श्रुतं॥ कथं द्यूतजिताः पार्था मम पूर्वपितामहाः॥ आसमुद्रां
महीं विप्र चक्रमुस्तीर्थलालसाः॥ केन ते सहिता स्नातं संप्राप्ता विंध्यपर्वतं। तत्सर्वं कथ-
य प्राज्ञ सर्वज्ञासीति मे मतः॥ वैशंपायन उवाच॥ साधु पृष्टं महाराज सामवंशविवर्द्ध-
न॥ कथयामि यथा दृष्टं त्वया यच्च श्रुतं मया॥ नमस्कृत्य त्रिकालज्ञं महद्व्यासं महामु-
निं॥ भगवंतं तपःश्रेष्ठं गुरुं गीर्वाणवंदितं॥ पितामहास्तु ते पंच पांडवाः सहकृष्णया॥ उ-

षिभिर्ब्राह्मणैः सार्द्धं काम्यकं तु वनोत्तमम्। ऋतुस्थालकस्तत्र काश्यपश्च गा
लवो॥ विलांडकाव दनिधिः र्गुरुस्थामितद्वलः॥ वलास्यालामशश्चैव श्रे
ष्याश्चैत शिरामुनिः॥ जैगीषव्यश्च चीकायश्च स्तथान्ये ब्रह्मपोविशाः॥ ब्रत्य द्रे
भ्रममाणास्तपांडवैः सहस्रसुव्रताः॥ स्नाता आनेकतीर्थेषु गतास्तविंध्यपर्वतं।
तत्राश्रमथापश्यन्नानावृक्षविराजितं। त्रिविष्टपतरुस्पर्द्धि समृद्धिवकुलेस्य
रैः॥ सहकारिश्चखर्जूरैर्नालिबिल्वपाटलकेतकैः॥ कदंबैश्चंदनेनीपैर्निबिडं
बीवतिंदुकैः॥ नालिकरककपित्थैश्च खर्जूरपनसैस्तथा॥ नानाद्रुमलताकीर्णं
नानावल्लीलिरावृतं॥ सुपुष्पितं फलैः कांतं यथा चैत्ररथं वनं॥ जलाशयैस्तु विपु
लैः पद्मिनीखंडमंडितं॥ सितिस्थालाहितैः पद्मैनीलपीतैः स्तथैव च॥ हंसकारंड
वाकीर्णं चक्रवाकोपशोभितं॥ हंसादिपकचाक्रैश्च रंजमानेषु षट्पदैः॥ सिंहव

५

प्रवगादिश्वशगाडोश्चैव मदोत्कटैः॥ महिषैश्च महाकायैर्द्वीपिशोस्त्रिनकेस्तथा।
खड्गैश्चगवयैश्चैव सिद्धगणमायुसंवृतं। शशकैः शल्लकैश्चाविलूकैरन्यैश्च
उष्यदिः॥ शालितं कोकिलानादैर्मनःकांतं सुशोभनं। जीवंजीवकसंघुष्टं नाना
पक्षिसमाकुलं॥ दुःखशोकविनिर्मुक्तं सदोत्कट मनोरमं। क्षुत्पिपासादितं ख
ष्टं सर्वव्याधिविवर्जितं॥ सिंहीस्तनं पिबंत्यत्र कुरंगा निर्भयानृप॥ माजरिमूषिको
चो नाव कत्रसमवस्थितौ। क्रीडंतिकरिणः सिंहैर्लांगिनस्तु कलापिभिः॥ प्रविश्य
कन्नात मरवं च वर्ध्यानंदपूरिताः॥ एवंविधवनंतस्मिन्प्रविष्टः पांडुनंदनः॥ स
श्रायमप्रलंपश्यन्नाश्रमं ब्राह्मणैः सह॥ मार्कंडेयं ददृशे वा नृतत्रतदा॥ दिव्यवर्त्मसं
मुक्तं युक्तो विषयेभ्यो विमुक्तं बुद्धिगुणोः श्वलैः॥ रिक्तं सांसारिकैर्भावैः॥ संप्रवृक्तं परमात्मनि॥
उद्दिक्तं न प्रमादाद्यनुनिर्लिप्तं चात्मविद्यया॥ सपिलिः सत्यमानंतं नानाशास्त्रविशार

द्विः। ऋषिभिः सत्त्वसंपन्नैस्तोयाचारसमन्वितैः॥ छीमज्जिस्थकमायुक्तैस्त्रिसंध्यं ज
पतत्परैः। ऋग्यजुःसामविद्भिश्च मैत्रिवेदिभिः परायणैः। केचित्तत्र चाग्निमध्यस्थाः के
चिदेकांतसंश्रिताः॥ ऊर्ध्वबाहुकराः केचिदादित्यक्रमणांतरा॥ सायंप्रातर्भुंजश्चा
न्ये अन्ये मासार्द्धभोजनाः। दशाहाहारास्तथा चान्ये केचित्तु शैवलाशिनः॥ फल
हारास्तथा केचित् शीर्णपर्णाशनास्तथा। अपरे नियताहारा वायुभक्षास्त्वलाड
नाः॥ एवं सुतेस्तापाद्वद्धिः सव्यमानं महामुनिं। दृष्ट्वा धर्मसुतः श्रीमान् ऋषिसंघैः
समावृतः॥ सुहृन्मुनिवरं शांतं ध्यायमानं परं पदं। तस्य पादतलं प्राप्य दंडव
त्पतितोऽग्रतः। नमस्यंतं प्रणतं दृष्ट्वा चिरादायतलोचनः। कालवान्निश्चचाचैनं रा
जानं धर्मवत्सलं॥ तस्य तद्वचनं श्रुत्वा वादारुकामुनिसत्तमः॥ आचचक्षे तदा मा
र्कंडेयाय धीमते॥ युधिष्ठिरायं नृपतिः संप्राप्तस्तव संनिधौ। कौरवः पांडु

६

तनयः सोमवंशविवर्द्धनः॥ च्युतो निजाद्राज्याद्भ्रातृभिर्वनमागतः॥ तच्छ्रुत्वा
वचनं तस्य मार्कंडेयो महातपाः। पृच्छति भगवांस्तत्र समालिंग्य नृपोत्तमं॥ मूर्द्धि
स्त्वा हु पाघ्राय आसनं उपवेश्य तं। आसीनस्यार्घ्यनृपतेः पूजां चक्रे महा
मुनिः॥ वन्यमूलफलैर्मालैः रसैश्च विविधैः स्वादुभिः॥ पांडवानुब्राह्मणांश्चैव यथा
योगमपूजयत्॥ इति श्रीवायुपुराणे रौद्रीसंहितायां नर्मदामाहात्म्ये द्वितीयो
ध्यायः॥ २॥ छ॥ ॥वैशंपायन उवाच॥ मुहूर्त्तं चैव विश्रम्य धर्मपुत्रो युधिष्ठिरः॥ द्वि
अन्यानन्यकरालस्थान्मुनीनामपि चाश्रमे तान्। स्वस्थासीनं तु सर्वं मार्कंडेयं च
महात्मा। पप्रच्छ नृपतिश्रेष्ठः कौतूहलसमन्वितः॥ युधिष्ठिर उवाच॥ भगवन् सर्व
लोकानां दीर्घायुस्त्वं मतो मम। सप्तकल्पान्तरप्राणाः कथयस्व प्रसादतः॥ कल्प
क्षये पिलोकस्य स्थावरस्य चरस्य च॥ न विनष्टोसि विप्रेंद्र कथमेको युगक्षये॥

च २

गंगाद्याः सरितः सर्वा आसमुद्राश्च याः स्मृताः॥ तासां मध्ये स्थिताः काश्चित् काश्चिदेव प्रन
ष्टं गताः। एतत्कथय मे तात प्रसन्नेनांतरात्मना॥ कश्चासीज्जवतामाद्ये दिवा देवी युग
क्षये॥ श्रोतुमिच्छामि विप्रेंद्र ऋषिभिः सह बांधवैः॥ श्रीमार्कंडेय उ०॥ ॥ साधु पृष्टं
त्वया राजन् धर्मपुत्र युधिष्ठिर॥ कथयामि यथान्यायं त्वं पृष्टोसि मामिह॥ सर्वपापहरं पुण्यं
पुराणं रुद्रभाषितं॥ रुद्रात्तु लोकपालाश्च वायुरीशाच्च सर्वशः॥ श्रावयामास देवा
दीन् मुनीन् राजर्षिसत्तमान्॥ ऋषिवृंदसमासीनस्ततो मे तत्र तारता यः श्रोणोति नरोत्त
मः। तस्य पुण्यफलं शृणु॥ अश्वमेधसहस्राणां वाजपेयशतेन च। यत्फलं समवाप्नो
ति तदस्य श्रवणान्नरः॥ ब्रह्महा च सुरापी च स्तेयी गोघ्नस्तथा नरः॥ पुराणमेतदाकर्ण्य
मुच्यते सर्वपातकैः॥ जाह्नवी सरितां श्रेष्ठा। तथा चैव सरस्वती॥ कावेरी देविका नद्या। सिं
धुः शालकटी तथा॥ सरयूः शतरुद्रा च चंद्रभागा स्वरी तथा॥ गोदावरी महेंद्री च। पयो

ष्णी यमुना नदी॥ शिप्रा ह्यानन्दवेदनी॥ तथा चर्मण्वती शुभा॥ एतास्त्वन्याः सरितः श्रेष्ठाः सर्व
पापहराः स्मृताः॥ किंतु तत्कारणं तात वद त्वं मे नृपसत्तम। समुद्राः सरितश्चैव कल्पे कल्पे
क्षयं गताः॥ सप्तकल्पक्षये क्षीणा न मृता तात नर्मदा॥ एषा देवी मया दृष्टा तात तावत्क्षया
मितं तथा॥ आश्चर्यभूता राजेंद्र त्रिषु लोकेषु विश्रुता॥ ॥ इति श्रीवायुप्रोक्तरुद्रसंहि
तायां नर्मदामाहात्म्ये तृतीयोध्यायः॥ ३॥ ॥ छ॥ युधिष्ठिर उवाच॥ ॥ सप्तकल्पक्षया
घोरास्त्वया दृष्टा महामुने। न चान्या दृश्यते त्वत्तो दीर्घायुरिह कश्चन॥ त्वया ह्येकार्णवे
सुप्तः पद्मनाभः सुरारिहा॥ दृष्टः सहस्रचरणः सहस्रनयनो हरिः॥ त्वं किलानुग्रहात्तस्य
। दह्यमाने चराचरे। न क्षयं समनुप्राप्तो वरदानान्महात्मनः॥ किं त्वया आश्चर्यभूतं च दृष्टं
च भ्रमतानघ॥ तदाचक्ष्व भगवन्। परं कौतूहलं हि मे॥ संप्राप्ते तु महाघोरे युगस्यांते महा
क्षये॥ अनावृष्टिहते लोके। पूर्णवर्षशताधिके। अप्रधीनां क्षयप्राप्ते॥ देवदानववर्जि

ता। निर्वाणे निर्वषट्कारे कलिना दूषिते त्वहं। सरित्सरस्तडागेषु पल्वलोपवनेषु च। मंत्र
ष्कृश्रुतदा ब्रह्मन् निराकारे युगक्षये। जातं महार्णवं घोरं। निर्ग्रहं छत्रविट्जनाश्च
प्ययस्थमहात्मानो। दिव्यात्मजः समन्विताः। स्थिता निका निल्हता निगता निचं महामुने। क्ष
यमंतमहालोग। कथयस्व प्रसादतः। कथं तात च विखंड कथं सिद्धिमुपागताः। ब्रह्मवि
भूतद्वाद्याः कलौ प्राप्ते महामुने। एवं पृष्टस्तदा तेन धर्मराजेन धीमता। मार्कंडेः प्रत्यु
वाच इदं ऋषिसंघसमावृतः॥ मार्कंडेय उवाच॥ ॥ श्रावं उत्तमपयः सर्वदेवयासकनराधि
प। महर्षुणां श्राविलकं शंभुना वायुदेवता। वायोः सकाशात् स्कंदेन। श्रुतमेतत्सुरात
नो। वसिष्ठः श्रुतवांस्तस्मान्मुनिः पराशरस्ततः। तस्माज्जातूकर्ण्येन। तस्मादपि महर्षि
भिः। एवं परंपराप्राप्तं। शतं सहस्रं हि जातं मे। संहिता शतसाहस्री। पुराक्ता शंभुना।
किल। आलोड्य सर्वशास्त्राणि विदार्थं तत्त्वतः पुरा। युगरूपाणा मा पश्चात् चतुर्द्धा विनियो।

८

त२

जिता। ततु ब्रह्मानुसारेण नराणां उ महर्षिभिः। आराधय स्तुत तं तर्हि। मया पूर्वमिदं
श्रुतं। पुराणं यत् श्रुतं तात निवक्ष्याम्यशेषतः। यत् श्रुत्वा च मुच्यते जंतुर्नानापापैर्नर
श्वर। मनो वाक्कर्मजैश्चैव सप्तजन्मसु संचितैः। सप्त कल्पक्षया घोरा। मया दृष्टाः
पुनःपुनः। प्रसादाद्देवदेवस्य शूलिनः परमेष्ठिनः। द्वादशादित्यनिर्दग्धमंडले
संक्षावितनदी। श्रांता हं विक्रमं स्तत्र तरन्बाहुभिरर्णवं। अपश्याहं सलिलांतस्त्र
दित्यसमरूपिणं। पुराणां पुरुषं राजन्नट्टाट्टपरमाद्भुतं। शृंगाग्रगिरिराजस्य लामयं
तं दिशो दश। द्वितीयात्यामनुर्दृष्टः किंचिद्ज्ञयसमन्वितः। अगाधक्रमतस्तापितमा
नेतमहार्णवा। अविश्रमनुमुहूर्तं उच्चकारूढ ड्वानघ अपश्याहं नयसंत्रस्तमस्तनू।
बाहुभिरर्णवं। नवस्वस्थमहामस्यमपश्यं मदसंयुतं। ततो ब्रवीत्समां दृष्ट्वा पाप्यहि इत्येव
नरेन्। परः पुरुषनः सर्वेषामस्यरूपाणा मादश्वरः। ततो हं त्वरयागत्य। मन्मुखं तन्न प्रसन्न

मासुरं। तान्विगतज्ञानः परं निर्वेदमागतः॥ अथापश्यत्समुत्तमहदावर्त्तसंकुलां॥
उद्यत्तरंगसलिलां फेनपुंजाट्टहासिनीं। नदीं कामगमां पुण्यां नक्रमीनसमाकुलां॥
ततस्तस्यास्तु मध्यस्थां प्रमदां कामरूपिणीं॥ नीलोत्पलदलश्यामां। महदाकारवा
हिनीं॥ दिव्याष्टकचित्रांगीं॥ कर्मकुंडलशालिनां। स्त्रीलावण्यसंगृह्य महाप्राणं
च व्यवस्थितां। तामनुःप्रत्यक्षवाचेदं कात्वं दिव्यावरानने। तिष्ठसि एकनकार्णवे त्वं
सुरसुंदरि। सुरासुरगणानाष्टे नष्टेस्थावरजंगमे॥ अविनष्टा कथं देवि भ्रमसि लील
यार्णवे॥ सरितः सागराः शैला॥ क्षयं याताह्यनेकशः। त्वमेकानुकथं देवि। तिष्ठसि का
रणं महत्॥ श्रोतुमिच्छाम्यहं सर्वं कथयस्व प्रसादतः॥ अबलोवा॥ ईश्वरांगसमुद्भूता। अ
मृतानाम विश्रुता। सरित्याप्रवरा विप्र मामाश्रित्य लयं कृतः॥ सहं पातमसुं तुलां। गृही
त्वाह्यागतानघ॥ तत्रेदं पातमसंस्थानं। यत्र तिष्ठति शंकरः॥ मार्कं०॥ तस्यास्तद्वचनं श्रु

वि५

५

त्वा विस्मयोत्फुल्ललोचनः॥ मनुर्नाम महाराजेंद्र। प्रणतो रूढहृष्टदंतदा कृतांजलिः
पुटोस्तुत्वा। प्रणम्य शिरसा विष्णुं। स्थापितं परमेश्वानं। सर्वमत्वालयं प्रदं। सद्योजाताय देव
देवाय वै नमः। नवालाव नमस्तुभ्यं। लक्षितावित मानस। तत्पुरुषायनमस्तुभ्यं। स्वर्मयाय च
रांनवे॥ नमोस्त्वघोररूपाय वामदेवाय वै नमः॥ नमस्ते नष्टकालाय। कलिरूपा
य ते नमः॥ तथा तत्पुरुषेशान रूपायांधकनाशिने॥ अचिंत्याव्यक्तरूपाय। महादे
वाय ते नमः। जगत्सृष्टि विनाशानां। कारणाय नमो नमः॥ एवं स्तुतो महादेवः पूर्वं स्त्रे
होमयानघ॥ प्रसन्नोह्यवदन् पश्चात्। वरं वरय मामिति॥ इति श्रीवायुप्रोक्तरुद्रसंहि
तायां नर्मदामहात्म्ये चतुर्थोध्यायः॥४॥ ॥छ॥ मार्कंडेय उ०॥ ततोसौ वायुमुनीस्म
त्रिकूटशिखरस्थितः॥ महाकनकवर्माला। नानारत्नोपशोभिता। महासनमुखासीनं
रुद्रकोटिसमावृतं॥ महादेवं महात्मानमीशानमजमव्ययं॥ सर्वव्रतमयं तातम

शांताय२

तुनामवसुव्रता। ह्यायावचंदे चराणां सर्वदेवनमस्कृता। तत्रास्तायुगमादस्रं सहस्र
द्रुणमानदा। तस्मिन्नेकार्णवे घोरे स्थिता दं कमनंदन॥ युधिष्ठिर उवाच॥ ॥एतत्श्रु
त्वा तु मे तात परं कौतूहलं हृदि। जातं तत्कथयस्वेति श्रावतः सह बांधवैः॥ कासौ प
द्मपलाशाक्षी तमोस्तातमहार्णवे। कुवाणा सह ज्योत्स्यका भ्रमंती योगिनी यथा॥ मा
र्कंडेय उवाच॥ ॥इममेव मया प्रश्नं पुरा पृष्टो मनुः स्वयं। तमेव तत्प्रवक्ष्यामि। अ
बलायाः समुद्भवं। अतीतायां निशायां तु ब्रह्मणः परमेष्ठिनः॥ प्रनाते विमले जाते
म ज्यमानष्ठ ऊं तु ष्टु मनुं प्रणम्य शिरसा पृष्ठवान्यहं तद्युधिष्ठिर॥ कैयं स्त्रीपद्मपत्रा
क्षी श्यामा चंद्रनिभानना। एकार्णवे भ्रमंत्येका। वदती सुड्डाडतिष्ठा। वेदमाता नु सा
वित्री। किंवा ब्राह्मी सरस्वती। उमावा शाश्वती देवी। लक्ष्मी मंदाकिनी नु वा। कालरा
त्रिस्थिता वा सा। प्रकृतिर्विस्मुरवाचिता। एतदाचक्ष्व भगवन्। यामाव्यमृतसंभवा। त्व

मन्यकार्णवे घोरे नाष्टे स्थावरजंगमे॥ मनुरुवाच॥ ॥श्रृणु विप्र यथा दृष्टमस्या व
क्षामि संभवं। यथा रुद्रान्समुद्भूता या च यं वरवर्णिनी॥ पुरा शिवः शांततनुश्चचा
र विपुलं तपः। हितार्थं सर्वलोकानामुमया सह शंकरः॥ रुद्रो गिरिं समारुह्य। तपो
तप्यत्सुदारुणं। अदृश्यः सर्वभूतानां। सर्वभूतात्मको विभुः॥ तप्यतस्तस्य देहा
द्वा स्वेदः समलवक्लिन्न॥ स गिरिं प्लावयामास। स्वेदो रुद्रांग संभवः तस्मात्स्वेदात्स
मुद्भूता महापुण्या सरिद्वरा। या व्याप्यैकार्णवे दृष्टा पद्मपत्रायतेक्षणा। स्त्रीरूपं स
मभाषाद्य रुद्रस्याराधनरता। आद्ये कृतयुगे तस्मिन्समानामयुतं द्विज॥ ततस्तु
ष्टो महादेवस्तु मया सह शंकरः॥ उवाच तां महानागा। ब्रूहि यत्ते तिवांछितं। सरि
दुवाच॥ ॥प्रलये समनुप्राप्ते नष्टे स्थावरजंगमे। प्रसादात्तव देवेश अक्षया
भवाम्यहं॥ सरित्सागर संघातान्। क्षयं यातेचराचरे। प्राणात्तव प्रसादेन तथा।

या

ह्त्या नवाम्यहं॥ येन रा पातकैर्युक्ता। महापातकिनस्तथा॥ मुच्यंते पातकैर्घोरैस्न
ध्यास्नातामयि उत्तरे जाह्नवी देशे। यथा पापप्रणाशिनी॥ तथा मे दक्षिणे दे
शे। तथाहं सुरवंदिता॥ स्वर्गदा गच्छतां गतिः। यथा रव्याता मिता विलौ। तथा दक्षिणा
गंगतिः नवामि त्रिदशेश्वर॥ पृथिव्यां सर्वतीर्थेषु। स्नात्वा यल्लभते फलं। तत्फलं ल
भतां मर्त्यो मयि स्नाता महेश्वर॥ ब्रह्महत्यादिकं पापं। मनुजैः संचितं क्वचित्॥
मासमात्रेण तद्वच्छयं यात्ववगाहनात्॥ सर्वदा नोपवासेषु। सर्वतीर्थावगा
२८ हनात्। यत्फलं लभते मर्त्यस्तद्भवतु मम दर्शनात्॥ मम तीरे नराध्येत। वृषध्वजं तिमाहेश्व
रं। चांविलुं परं शांतं। तयोरुपरमं पदं। मम कूल महेश्वान। उमया सहितः प्रलो। यम
नित्यं जगन्नाथ। पापपंचवरास्तु मा। ममाता येन संस्पृष्टाः पाषाणा मम तीरजाः॥ वि
णाः शिवतां वंतयच्चं उ नरवांछितं। सुकर्मा वा विकर्मा वा शांता दांता जितेंद्रियः। म ११

ता मम जलैः स्पृष्टो जितेंद्रियो वा स्यात्तु शिवातिथिः॥ त्रिषु लोकेषु विख्याता। सर्वपाप
प्रणाशिनी। नवामि देवदेवेश। तव प्रसादात्तथा कुरु॥ एतांश्चान्यान्वरान्दिव्या
न्। प्रार्थितां स्तु ततस्तवाथ वानुयुक्तान् तान्मे ददि महेश्वर॥ एवं विनययुक्ताय य
प्रार्थयंत्या नृपोत्तम। श्रुत्वा देवो नर्मदायाः प्रसन्नो वाक्यमब्रवीत्॥ महेश्वर
उवाच॥ ॥एवं भवतु कल्याणि यत्त्वया कमनिंदिते। नान्यो वरो हि लोके स्मिन्मु
क्त्वा त्वां वरवर्णिनि॥ यदि वममदेहात्त्वं। प्रसूता वरानने। तदेव सर्वपापानां। मोच
नी त्वं न संशयः॥ कल्पक्षयकरे काले कल्पोद्याते विशेषतः। उत्तरे कूलमासाद्य निव
सिष्यंति ये नराः॥ अपि कीटपतंगाद्या। वृक्षगुल्मलतादयः। वन्नायपतनाद्दैविते।
पियास्यंति परां गतिं। दक्षिणं कूलमासाद्य। यदि जा धर्मवत्सला॥ आजन्म निवसिष्यं
ति पितृलोकनिवासिनः॥ अहं तु न भवाम्यन कस्मिंश्चित्कारणांतरात्। वसिष्यामि सदा

दविस्मयं तवतटाश्रितः॥ ब्रह्मांडं चंडवरूणाः॥ सिद्धाश्च मद्विष्णुना। उक्तावाद
वितकल्पवसिष्यंति ममाज्ञया॥ दक्षिणां पिद्रलिसा ईतथान्यसुरसुंदरि॥ वसिष्यं
ति मया साई देव्याणवरानम॥ कल्याणं जम्फलाक्तानामश्रुतं नाशयस्व च॥ गच्छवि
ध्रिंमहाभाग मर्त्यानुपापाक्षिमाचया मद्दिता ऋषिसंघेस्त्वं तथा सिद्धसुरासुरैः॥ मा।
क्रींडयण॥ ॥एवमुक्ता महादेव उमया सहितो विभुः॥ वंद्यमानोथ मनुना तथा।
चादर्शनं गतः॥ तनिघासुमहापुण्या सर्वपापप्रणाशिनी॥ यादृष्टा सर्वतालमात
तवउविस्मयः॥ एषा गंगा महापुण्या त्रिषुलोकेषु विश्रुता॥ अपातालैः पंचदशलि
पावयंती दिशो दश॥ शृणुतानि महाभाग। वक्ष्यामि ऋषिसत्तम। नामानि महान
दस्त्रैव। नर्मदा सुरसा कृपा। मंदाकिनी महापुण्या त्रिकूटा विमला तथा॥ चित्रोप
ला विपापा चरंजना वालुवाहिनी॥ महार्णवा विपाशा च रेवा चकरतात्था॥ स

कपादप्रभुताश्च। सर्वाविरुद्ध संभवा॥ सर्वपापहरा पुण्या॥ सर्वमंगलदाः शिवाः॥ इ
त्यते नमिलिदिह्विख्यातवदपारगैः॥ पुराणाज्ञैर्महाभागैराज्यपिः सामपैस्तथा॥
इत्यतत्सर्वमाख्यातं। महाभाग नृणां नृप। मनुनाक्तं पुरा मह्यं॥ अमृतायाः समुद्भ
वं पुण्यं पवित्रमतुलं रुद्रोद्गीतमिदं शुभं॥ ये नराः कीर्तयंत्यत्र नक्तं श्रावंति चैव।
यच प्रातरुत्थाय नाम्नां दिकलापंचदश पंचकं॥ तेनराः सकलं पुण्यं लभ्यंतेह्यवगा
हजं। विमानेनार्कवर्णेन घंटाशतनिनादिना। युक्तामानुष्यकंतावं तयास्यंतिप
रांगतिं॥ इति श्रीवायवरुद्रगीत महानदी नर्मदा माहात्म्ये पंचमोऽध्यायः॥ ५॥ ॥
युधिष्ठिर उवाच॥ ॥आश्चर्यमेतदतुलं कथितं। से द्विजोत्तम॥ स्वयान्यत्कथयस्व
हपरं कौतुहलं हिमे॥ महाभागमिदं श्रुत्वा। नर्मदायाः समुद्भवं। परं विस्मयमापन्ना
ऋषिसंघा मया सह। अहो भगवती पुण्या। नर्मदेयमयोनिजा। रुद्रदेहाद्विनिःक्रांता

महापापक्षयंकरी। सप्तकल्पक्षये प्राप्ते त्वयेयं सह सुव्रत। न मृता च महाभा-
गा किमतः प्राणमुत्तमं। कालकल्पाः समुद्दिष्टाः सप्तलोकक्षयंकराः। न मृता यद्वि-
यं देवी त्वं चापि ऋषिपुंगव॥ अपृच्छिगणासंपातं जगत्येकार्णवीकृते। कीदृक्-
रूपः समभवन्महादेवो युगक्षये। कथं संहरते विश्वं कथमास्ते महार्णवे। क-
थं च सृजते विश्वं कथं धारयते प्रजाः। कीदृक्कल्पास्तथा देवी जगत्येकार्णवी-
कृता। किमर्थं नर्मदा प्रोक्ता रेवति च कथं नु सा। त्रिकूटा च किमर्थं सा किमर्थं वा-
लुवाहिनी। कोटितीर्थसमायुक्ता प्रविष्टा या महार्णवे। किमर्थं सरितस्तात नर्म-
दां समुपासत। यज्ञोपवीतैर्ऋषिभिर्देवतानिलयैव च। विलोक्ते किमर्थं च स्तूयते
मुनिसत्तम। धिष्ण्यानि च पुराणाद्ये किमर्थं प्रोच्यते नघ। कस्मात्त्वा न तु तीर्थं प्र-
जनीयाः सरिद्वराः। तीर्थानि च पृथक्कृत्वा क्षियप्रसंनिहितानि हराः। किं प्रमाणं च सा दे-

वी या रुद्रेण विनिर्मिता। कीदृशानि च कर्माणि रुद्रेण कथितानि ते। कथं म्लेच्छसमा-
कीर्णा दक्षेयं द्विजसत्तम। पुनः प्राप्स्यते मा यज्ञेश्वरानुग्रहेण च। जाह्नव्याः स्थि-
तिं मन्ये यथा वेदनिरूपितं। इतिहासपुराणोक्तमिमं सर्वं ब्रवीहि मे॥ मार्कंडेय
उवाच॥ ॥ श्रावंतु ऋषयः सर्वे त्वं च तात युधिष्ठिर। पुराणं नर्मदायास्तु कथितं य-
त्रिशूलिना। वायोः सकाशाच्छ्रुतं मया तेनापि च महेश्वरात्। वेदार्णवं विनिर्मथ्य दे-
वेन ख्यापितं किल। न केवलं पुराणेषु बह्वर्थं ग्रंथार्थविस्तरात्। अल्पायुषां मनुष्याणां
संक्षिप्तं ऋषिभिः पुरा। कल्पनामानि वक्ष्यामि शृणु राजन् यथातथं। मायूरं प्रथ-
मं कल्पं कौर्मं च तदनंतरं। तथा परं कालिकं च मात्स्यं द्विरदमेव च। वाराहं पद्मया-
हृष्टं विश्वं चाष्टमं परं। न्यग्रोधं नवमं तस्मात्सीदीक्षिकं तदनंतरं। पाद्मं च तामसं-
चैव संवर्तोद्वर्तमेव च। महाप्रलयमित्याहुः पुराणविदश्चिंतकाः। एवं संक्षेपतः स-

वैसंज्ञितंतैर्महात्मभिः॥ विरंचंचचतुर्नागोब्रह्मादेवमहर्षिभिः॥ तदहंसंप्रवक्ष्या
मिपुराणार्थविशारद॥ मत्स्यकल्पेमहाघोराअनुस्तताहिमयमया॥ महानागरमहाप्राप
ष्ठिरियंनमृतामरित्॥ जगदेतन्नमोस्ततमप्रज्ञातमलक्षणं॥ नष्टचंद्रार्ककिरणामसी
द्भूतविवर्जितं॥ तमासीत्तमहात्माविष्णुरूपःसडागुहुर्वः॥ चचारतस्मिन्नेकाकीव्यक्त
व्यक्तःसनातनः॥ सचिंतामकारमायातीनागायत्रीमसृजत्प्रभुः॥ सतयासार्द्धमीशानस्त्रि
क्रीडत्रिरूपाविराट्॥ स्वदेहादसृजद्दिव्यंपंचभूतात्मसंज्ञितं॥ क्रीडनार्थंप्रस
जत्स्त्रीभुः॥ नूबीजंहिरण्मयमसृजत्प्रभुः॥ तद्बांडमभवद्दिव्यंद्वादशादित्यसप्रभं॥ त
स्मिन्वापुरुषोजज्ञेचतुर्वक्त्रःपितामहः॥ सोसृजद्विश्वमेवंतुसदेवासुरमान
वं॥ सतिर्यक्पशुपक्षीकंसस्वेदांडजरायुजं॥ एतदंडपुराणेषुप्रथमंपरिकीर्तितं॥
पुराकल्पेनरपात्रसृष्टेक्रीडतःपरमेष्ठिनः॥ उमायुक्तस्यरुद्रस्यजगत्यकार्येदीक्ष

२४

ता॥ हर्षाज्जज्ञेपुराकन्याउमाहरांगसंभवा॥ रौद्रीमस्यारःस्थलतटात्तूमादेहवि
मर्दनात्॥ स्वदाजाङ्गमहादेवीकन्याराजीवलोचना॥ द्वितीयःसंभवोह्यस्याःरुद्र
देहाद्युधिष्ठिर॥ सापरिभ्रमतेलोकान्सदेवासुरमानुषान्॥ त्रिलोक्यांनामदज
नीरूपगुणप्रतिमातदा॥ तांदृष्ट्वादेवदैत्येंद्रामोहितालुब्धमानसाः॥ मृगयंति
स्मतांकन्यामितस्ततश्चधावती॥ हावभावविभ्रमैस्तुमोहयंतीचराचरं॥ भ्रमत
दिव्यरूपामाविद्युत्सौदामिनीयथा॥ मेघमध्यस्थितानातियथ्यासाकनकप्र
भा॥ ततस्तांरुद्रंसुराःसर्वेदिव्याश्चमहदानवैः॥ वरयंतिस्मतांकन्यांकामनाकुलि
ता॥ ततस्ताब्रवीन्महादेवेदानवाद्युपर्हिययः॥ बलेनदैतज्जमाचैवअधिकोयोभ
विष्यति॥ सहमांप्राप्स्यतेकन्यांनान्यवसुराश्चमाः॥ ततोदेवासुराःसर्वेतांकन्यांव
र्तुमुद्यताः॥ अहमेतांग्रहीष्यामिनवेत्यहमथाब्रुवन्॥ तावत्तापश्यतांतेषां॥

साकन्यांतरधीयत॥ पुनः पश्यंति तां सर्वे ये जनां नरसंस्थिताः। जग्मुस्त्वरिताः सर्वे
यत्र सा समदृश्यत। विलिख्यत्र लिख्य तथा ये जने दृश्यते पुनः॥ क्वचिद्दूरसमीप
चातपश्यंति मृगेक्षणां। योजनाजोश्चातेर्न्वेयः सदास्थितयुधिष्ठिर॥ तथाचात
सदास्थित्वा लघुवांप्र दृश्यत। क्वचिदग्रे क्वचित्पृष्ठे दिशासु विदिशासु च॥
तां पश्यंति वरारोहां एकधा बहुधा पुनः। दिव्यं वर्षसहस्रं तु भ्रामितास्तु तया पु
नः॥ न चावाप्तास्तु सा कन्या कद्रुदेहसमुद्भवा। सा क्षामयामहादेवा जज्ञासो द्विः
पुनः पुनः॥ गणास्तेन लसंघाते नृत्यंति च मुदान्विताः॥ अकस्माद्दृश्यते कन्या शं
करं समीपगा दृष्ट्वा विस्मयमापन्ना देवा यांति परां मुदं॥ तस्याश्चक्रे तदा नाम।
नर्मदा नाम्नि नाकं धकं॥ न विप्रा सिव रासा दृष्ट्वा मरितु श्रेष्ठा सम नर्मदा॥ स्वरूपा
वस्थिता देवः आपदा संयता शुभे। नर्मदा तेन नाम्ना या दीयं सुन्दरी तलजला शिवा॥ क

ल्पकल्पक्षये क्षीणे यदुक्तं शंभुना पुरा। न मृता येन तेना सा अमृता ख्यातिमा॥
गता॥ ततस्तां मददाकन्यां शीलरूपगुणान्वितां। महार्णवाय पतये सर्वस्तत्पतिः
प्रभुः॥ ततः सा कन्यका लोलं प्राप्त्य फेनपुंजाट्टहासिनी। विवेश नर्मदा देवी समुद्रं सरि
तां पतिं। एवं ब्राह्मपुराकल्पे नर्मदा लवदीश्वरात्॥ मायूरतीयोश्च यथा दृष्टाम
या पूर्वं तथा श्रृणु॥ इति श्रीनर्मदामात्म्यकल्पसमुद्भवो नाम षष्ठोध्यायः॥६॥ ॥
॥मार्कंडेय उवाच॥ ॥ पुनर्युगांतसंप्राप्ते तृतीये नृपसत्तम। द्वादशार्कतनुर्भू
त्वा लगवान्नीललोहितः॥ सप्तद्वीपसमुद्रांतं सशैलवनकाननं। दग्धवान् वसु
मतीं कृत्स्नां कालाग्निश्च महेश्वरः। ततो महाघनान् सृष्ट्वा प्लावयामास वारिणा॥ अ
तिकृष्णां तनुं धृत्वा विकृतं दिग्गजयुद्धशंकितः। प्लावयित्वा जगत्सर्वं तस्मिन्नेकार्णवी
कृते। शुभ्रा पविमललता ये संक्षिप्य जगदात्मनि। ततो हं विप्र संस्तत्र तमास्ततम

हार्मवे। दिव्यं वर्षसहस्रं तु वायुभक्ष्यता महेश्वरे॥ उक्तश्चा देव देवेशं येन दंगह
नीकृतं। ध्यायमानस्ततो देवं ब्रह्मांडं विमलं जलं। तस्मिन्न काले विष्णोरेन ष्टस्नाव
रजंगमे। मयूरं स्वसमीपस्थं ह्रष्ट्वा अपश्यं सहमा डालं। विचित्रचंद्रिकोपेतं नीलकंठं
सुलोचनं॥ ततो मयूरः समहार्णवांते विह्वारस्ययन्तु वारिमध्ये जावने॥ चचार दे
व स्त्रिशिखी शिखंडी त्रैलोक्यगो नाममहानुलावः। शिवेन तोषेण मयूररूपिणा
विह्वायमानेसलिलेस्थिते तस्मिन्॥ सहस्रमेतं च महार्णवे लसत्रिदिवंतो भगवा
न् ददर्श॥ उवाच तं दिव्यमयूररूपिणं हृष्टान्तमंती महद्भूमिबाले॥ कात्वं भलया

नर्म ३)

स्थतदिव्यादेहाक्षयं नयां तामिमहाक्षयांतां। देवासुरगणानष्टे स्थावरजंगमे। का
त्वं भ्रमसिपद्माक्षि आतायातामिन क्षयं॥ देव्युवाच॥ ॥ नवप्रमाद्देवश्च मृत्यु
र्ममनविद्यातास्त जादेवजनविस्थेर शर्वरी क्षयमागता॥ एतत्तु श्रुत्वा महादेवोव

१६

धुनत्पक्षिपंजरं। तावत्पक्षिपुटान्तस्पदात त्वाश्च सहस्रवरः। निर्गता देवदें
त्यंद्राः संघा दिव्यमरुद्गणाः॥ तेषां मध्ये पुनः सा तु नर्मदा भ्रमत सरित्॥ तत्र
स्थान्यामहाशिलाहस्त्यं तरतर्पल। त्रिलिः कूटैः सुविस्तीर्णैः श्रृंगवानिव गोवृ
षः। त्रिकूटा इति विख्यातः सर्वरत्नैर्विभूषितः॥ कूटादस्मादियं देवी प्लावयंती
महीमयो॥ त्रिकूटात नविख्याता पिहगां त्रायणीपरा। द्वितीयाद्वै ततो गंगा निर्ग
ता धरणीतले। तृतीयं च ततः कूटं सप्तधा पंडशो गतं॥ जंबूद्वीपे तु संजाताः सप्तत
कुलपर्वताः॥ चंद्रनक्षत्रसंक्षितं वनग्रामनदावृतं। अंडजं स्वेदजं जातमुद्भि
ज्जं च जरायुजं॥ एवमादि जगत्सर्वं मयूरादस्तवत्सुरा। चरंस्त्विरं महाराज महादे
वसमुद्भवं॥ तातानदीः समुद्रांश्च संविलङ्घ्य पृथक् पृथक्। उवाच नर्मदां देवा गच्छ
त्वं दक्षिणां दिशं। त्वद्दक्षिणा गंगा रूप्या महापातकनाशिनी॥ उत्तरे जाह्नवी देवी

पुण्यं त्वं दक्षिणास्तले ॥ यथा गंगा महाभागा मम मस्तकसंस्थिता ॥ तथा तत्त्वं तथा सु
णा न विद्यसि सरिद्वरे ॥ त्वया सह चरिष्यामि निजांशेन सुव्रते ॥ महापापग
दान्ना नामोघं त्वं न विद्यसि ॥ एवमुक्ता तु देवेन महापापौघनाशिनी ॥ दक्षिणां
दिशि वेगं तु सा जगाम महानदी ॥ रुद्रदेहोद्भवा साद्यादेवी शादिलिर्ह्नता ॥ म
होघैः प्रस्थिता देवी नृत्यंतीव सुरेर्हता ॥ यस्मान्महार्णवे घोरे हस्थत महती ॥
सरित् ॥ महार्णवेति सा प्रोक्ता तेन यं नृप सत्तम ॥ तत्पतस्तस्य देवस्य स्वलाग्रा द्विं
दवाः पतन् ॥ गणाः गणा लिंध तन ॥ दशास्यो दशास्यं ख्याय ॥ सर्वासां नर्मदा पुण्या
रुद्रदेहाद्विनिःसृता ॥ सर्वान्योपि सरितं श्रेष्ठ वरदा नर्मदा महात्मनः ॥ शंकरानुग्रहा
द्देवी महापुण्यतमा स्मृता ॥ यस्मा द्विहास्यमाना पि दिग्गजैरचला पर्मेः कलुष
त्वं न संप्राप्ता रमन सुरसा तेन ॥ रूपां कारा तिसा यस्मात् लोकानामभयप्रदा ॥ संसार

१७

र्णवमग्नानां तेन नाम्ना कृपा स्मृता ॥ पुरा कृतयुगे भूप दिव्यं मंदारभूषिता ॥ कल्प
वृक्षसमाकीर्णा पद्मोत्पलसमावृता ॥ मंदं वहति वक्रांगी तेन मंदाकिनी स्मृता ॥ नित्या
महार्णवं क्षिपंति यस्मात् हृग्गादि दामला ॥ वृद्ध्या सुरगणैः सिद्धैस्तस्मात् दीर्घा महार्णवा ॥ वि
चित्रा पलसंघाते हिं पस्त क हिंडिर्ह्नता ॥ लिंवा घोलंत विपुलं प्रयाति यं महार्णवं ॥ भ्रा
मयंती दिशः सर्वा वातिप्रगणा वेगतः ॥ प्लावयंती विराजंती तेन सवानिमहिता ॥ नार्यापु
त्रकलत्रादि पाशैः संवेष्टितान् नरान् ॥ विपाशान् कुरुते यस्मात् विपाशा तेन सा स्मृता ॥
विण्मूत्र निचयमग्नानां प्राणिनां शुक्रशोणितकर्दमे ॥ पापे निहितं ये संबद्धान् यस्मान्मोचयते ॥
ततं ॥ विपापेति ततः प्रोक्ता संसारार्णवतारणी ॥ नर्मदा विमलां नाज विमलेंदु सुखानना
॥ तमो त्वत्लं महाघोरं यस्मात् दहति महाभसा ॥ विमला तेन सा प्रोक्ता विद्वद्भिर्नंदमातमा सु
धाकरकरप्रख्ये स्तिमंशोरिव मंडलैः स्वकरैर्नाशयद्विश्वं करमा तेन चाचयाता ॥ यस्मा

ड्रंडयतलोकान्॥ दर्शनादेवनारत॥ रंडनी तनमोबोक्ता॥ ब्रह्मणं ज्ञेन्द्रीयान्नम॥ इणावी
रुधधगुल्माद्यान् तिर्यंचपशुपक्षिणः॥ वालुक्ताताबुवाक्त्वं श्रीतनिषावालुवाहिनी॥ एवं
यावत्तिनाम्नो द्विनिर्मथ्यं नरसत्तम॥ सद्याति पापनिर्मुक्तो रुद्रलोकं न संशयः॥ इतिश्री
रुद्रसंहितायां नर्मदामाहात्म्ये मायूरकल्पसंस्थावानाम॥ ७॥ मार्कंडेय उवाच॥ ७ ॥ ह्यो
पुनरेकार्णवे घोरे नष्टे स्थावरजंगमे॥ सलिलेनाप्लुते लोके निरालोके तमोमये॥ ब्र
ह्मेकाद्यचरन्नत्र तमोभूते महार्णवे॥ दिव्यं युगसहस्रं तु खद्योत इव दीप्तिमान्॥ अथ
घोरार्णवे सुप्तमपश्यत् कूर्मरूपिणीं॥ देवं प्राणाजनमादत्संमसंतान्यामसंस्थितं॥ हृदृशा
दिव्यसंकाशं सहस्रचरणं॥ तं दृष्ट्वा विस्मयापन्नो ब्रह्माबोधयत्तदा निः॥ स्तुतिभिर्मंग
लैश्चैव वेदवेदांगसंभवैः॥ श्रीब्रह्मा उवाच॥ ॥ वाचस्पतिविष्णुध्यस्त्वमहादेतन मोस्तुते
॥ तावाद्यो जगत्सर्वं तिष्ठति परमेश्वर॥ तद्विमुंचमहासत्त्व प्रसूर्वं संहृतं त्वया॥ यतीनारक्ष

१८

नीत्राह्मी दिनं समनुवर्त्तत॥ निरी[illegible] त्रिलोक [illegible] यनसंभवतज्जगत्॥ सतिरूपमपस्य
चस्तस्य विष्णुः परमेश्वरः॥ [illegible] मिन्न [illegible] मीवाधारे नदीनदविवर्जिते॥ नानातरंगनिन
दामावर्त्तैर्हितमंडलं॥ देमसारमसंघुष्टं मस्य कूर्मसमाकुलं॥ दिव्यमायामयीं देवीं
तप्तजांबूनदप्रभां॥ नदीमपश्यद्द्ववाह्यनोपमजलाश्रयां॥ तस्या मध्ये बुदस्या
मांपीनोरुजघनस्तनीं॥ वस्त्रैरनुपमैर्दिव्यैर्नानालंकारभूषितां॥ मुनूपुरवाहामंग
रकेयूरमंडितां॥ ददर्श नर्मदां देवीं स्वयं स्त्रीरूपधारिणीं॥ योगमायामस्वित्रिलं घो
स्त्रिविर्द्धे षितां॥ सुव्यक्तांगी महानागामपश्यत्तु सजन नर्मदां॥ आर्घाद्यैतनुजांबालांप
द्मपत्रायतेक्षणां॥ स्तुवंती देवदावस्मुविन्तांतु जलान्नदा॥ ज्ञात्वात्वनन्तां देवीं पुर
तः संस्थितांस्तुलां॥ स्नात्वा चाशुलजलं तस्याः॥ प्रलुप्तां त्वा तु मुन्मनाः॥ अर्चयामास संहृ
ष्टो मंत्रैर्वेदांगसंभवैः॥ तस्याजलनममपिचलनत्स्नात्वा न्नापवनम॥ देवं सविह्वरांतां च न

क्षि योगादपृष्ठजयं ॥ ततो निरंजनो देवः सर्वभूतपतिः प्रभुः ॥ समुद्धृत्य लोकांस्त्रीन् ग्रस्ता
न् कल्पक्षयपुरा ॥ देवदानवगंधर्वाः सयक्षोरगराक्षसाः ॥ सचंद्रार्कग्रहाः सार्वभूरी
राक्षस्य निर्गताः ॥ ततस्त्रैलोक्यमखिलं ससर्ज परमेश्वरः ॥ जंगमाजंगमं सर्वं पुराकल्पे
यथा लवत् ॥ विस्तीर्णां चलशृंगाढ्यां सनिर्झरसरः सरित् ॥ इक्षुखंडसमायुक्तां ससविधि
पल्वलां ॥ हिमवंतं गिरिश्रेष्ठं श्वेतपर्वतमुत्तमं ॥ शृंगवंतं महाशैलं तथान्यान्कुलपर्व
तान् ॥ जंबूप्लक्षः शाल्मलिश्च कुशः क्रौंचस्तथैव च ॥ शाकश्च पुष्करः सप्त द्वीपानेवं
ससर्ज क्षारलवणा इक्षुसुरासर्पिर्दधिक्षीरांबुसप्तमान् ॥ महार्णवान् ससर्जाथ देवदेवो
जगद्गुरुः ॥ चतुःप्रकृतिसंयुक्तं स्वेदजांडजरायुजं ॥ युगांताग्निविनिर्दग्धं तस्याच्छिन्नं च
कारह ॥ दुर्गप्राकारकलितां दिव्यप्रासादतोरणां ॥ महाद्वालां महाजालां पताकाध्वजमा
लिनीं ॥ कूर्मपृष्ठोपमां देवी योन्मज्ज सवसुंधरां ॥ एवं सृष्ट्वापराजन्तून्जंतुनाम चराचरं ॥ १९

एवं दृष्टा मया राजन् निवयातान्नयं पुरा ॥ महादेवप्रसादाच्च तस्यैवांगसमुद्भवा ॥ प्रादु
र्भवमिमं कौर्मं यपवं तिह्विता न्नमः ॥ एप पिष्ठावंतिध्र मिष्टा स्त पियां ति परां गतिं ॥ इति
श्री स्वामा हात्म्ये कूर्मकल्पसमुद्भवो नाम ॥ छ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ छ ॥ः
नष्टे तस्मिन्कदा लोके पुनः सलिलाप्लुते ॥ अहमर्णवमध्यस्थो बाहुभ्यामतरं जलं ॥
दिव्यवर्षशतसहस्रां तादृं नृपसत्तम ॥ ध्यायन्समारसं देवं सुदुःखार्णवतारणं ॥ भ्रम
यमानस्ततस्तस्मिन्नपश्यं पक्षिरूपिणं ॥ हारकुंदेंदुसंकाशं बकं गांगक्षीरपांडुरं ॥ त
तोहं विस्मयाविष्टस्तं बकं समुदीक्ष्य वै ॥ अस्मिन्महार्णवे घोरे कोयं पक्षी समं त
तः ॥ बाहुभ्यां प्रतरन्श्रांतस्तं बकं दृष्टवानहं ॥ पक्षिरूपं समास्थाय कस्त्वं सकार्णवी
द्भात ॥ भ्रमसे दिव्ययोगात्मा मोहयन्निव मां प्रभो ॥ एतत्कथय मे सर्वं योगीशोसि नमो
स्तु ते ॥ सोब्रवीन्मां महादेवस्त्वात्राजमहमागतः ॥ जा ॥ सर्वं मयावसंकृतं किं न बुध्य

त्स। पितामातातवाद्दं विविस्मयस्य च मुनक्षवं। कारणं मम संजातं मग्नं त्वां वीक्ष्य चांबु
धि। पक्षिरूपं मम स्थायतत्वार्थेद्दं समागतः। किमर्थमातुरोत्स्वा त्वाश्रमसेश्रमदार्म
वा विशात्वं मम पक्षांतः सुखं विश्राममाप्नुहि। एवमुक्तस्ततस्तेन माधवेनाहं नरेश्वर।।
तस्य पक्षिपुटस्यांतः प्रविष्टो विद्रुमतूडाल। कालं युगसहस्रांतमत्रांतो ऽस्मि वमध्य
गः। ततः श्यामोऽस्मि सहसा दिक्षु सर्वासु सर्वतः। किंचिन्नूपुरसंमिश्रमुद्भूतं शब्दमुत्तमं।
तेनाश्रविजलं सर्वं क्षुब्धं दृष्ट्वा वाद्दनं। किमेतदिति संचिन्त्य दिशः सम वलोकयन्।। द
शदिक्षु क्षितं तंस्ततः कान्या आगताश्च महार्णववान्। वस्त्रालंकारसहिता नानारत्नो
पशोभिताः। काश्चिच्चंद्रसमानास्याः काश्चिदादित्यसप्रभाः।। काश्चिदिंदीवरश्यामाः काचि
द्रक्तोत्पलप्रभाः।। नानारूपधराः सौम्याः सर्वालंकारभूषिताः। अर्घपाद्यादिभिर्माल्यैर्वि
कमलं चयंस्तदा। ततस्तु पर्वताकारां पक्षी साद्भुतदर्शनः। प्रविवेश महाघोरं महासि

वर्णं विजलं वरुक्षकादिकृतायामं यावद्दमंडलं गतः।। योजनानां सहस्राणि तावंत्य
वशातानि च। तत्तन्मध्ये डलद्दष्टं नानारत्नसमाकुलं। दिव्यस्फटिकसोपानं रत्नस्तंभम
नोहरं।। पुरं योजनमात्रं च विस्तराद्द्विगुणायतं। वापीकूपसमाकीर्णं प्रासादादालका
वृतं।। कल्पवृक्षसमाकीर्णं ध्वजयष्टिविभूषितं। तस्मिन्नूपुरवररम्ये रत्नकांचनशोभि
ते। तस्यान्यतस्य मध्ये उद्यानं तत्र परमुत्तमं। शतयोजनविस्तीर्णं तावद्द्विगुणमायतं।
पुरमध्ये ततस्तत्र नदी परमशोभना। वहति पुण्यसलिला नानारत्नशिलातला।। तस्या।
स्तीरमयाद्दष्टं तडित्कृत्स्नसमप्रभं। इंद्रनीलमहानीलखचितं रत्नैः समंततः। क्वचिद्द
क्षिसमाकारं क्वचिदिद्रायुधप्रभं। क्वचित्कृष्णं क्वचित्पीतं क्वचिद्रक्तं क्वचित् सितं।।
नानावर्णं समडालिंगं दृष्ट्वा मुद्भुतदर्शनं। ब्रह्मविष्णुहिंड्रमाद्यैः समंतात्परिवारितं।। नं
दिकृत्संगिगणाशाद्यैः स्कंदाद्यैश्च संवृतं।। पश्यामि लिंगमीशानं भुक्तिमुक्तिप्रदं शिवं।

परिचार्य ततस्तं तु स्तुमान् देवदानवान्। प्रपश्यामि सुत्ताकारान् परमामीलि
लितक्षणान्॥ ततस्ताः प्रथमं पद्मा ह्युनार्यः परमसंमताः॥ तस्यान् द्या डालस्ता
न्वादिभिः पुष्पैर्मनोहरैः॥ दत्त्वार्घ्यपाद्यं विधिवत् लिंगस्य कमलेक्षणाः॥ अ
त्य चर्चयन्त्व राग्दा दशताः प्रमदोत्तमाः॥ ततस्तु त्य स्थितलिंगात स्मिंस्ताः स
र्वकन्यकाः॥ जग्मुश्चादर्शनं राजन् विस्मिताः स्वगृहाण्यथ। न चासौ पद्मिराट्
दृष्टो न स्त्रियो न च देवताः॥ तदाविकं स्थितं लिंगम चिंतं परमाद्भुतं। आमे
हं तु स्वसंमूढा रुद्रमायति चिंतयत्॥ तावान् द्याः सुमुन्तीर्य दिव्यालंकारात्प
णोत्राजयं ता जगास्ववंकन्यारारिं जीवलोचना। पद्मैर्दिव्या मये दिव्यैः प्रज्य
तल्लिंगमुत्तमं। पुनस्तज्जलमासाद्य प्रविवेश वरांगना॥ तस्मिन् पुरवराख्ये ता
मेवाहं पुनः पुनः॥ पश्यामि नृपकन्यां तां मर्चयंतीम हेश्वरं। तलाद्दृष्टं तां वरारो

हं दृष्टवानूकमललक्षणा। कात्वमस्मिन् पुरा देवि शिवार्चनरता वद। क्व गतास्ता
स्त्रियः सर्वाः क्व गता त्वगणास्वरः॥ नामोस्तु तमहानाम गच्छ दिशु प्रमदोदय। तव
प्रसादाद्विज्ञातुमिच्छामि कमलेक्षण॥ कथं ऊरु महा देवि कथयस्व यथातथं॥
स्त्रीउवाच॥ विस्मृतस्त्वं कथं विप्र दृष्टा कल्पपुरातन। मानवात्सस्मृतिभ्रंशः साच
हं कल्पवादिनी। नर्मदा नाम विख्याता रुद्रदेहाद्विनिर्गता। यास्ताः कन्यास्त्वया
दृष्टाः पूजयंत्या महेश्वरं॥ यालिश्चवरि मिव्हानीतः पद्मिराजसमन्वितः॥ विद्धि
कन्या दिशास्ता सुमच पद्मीमहाप्रभुः॥ चरातपद्मिस्त्र्यप्रणा। महायोगी माहेश्व
रः॥ पालिः शिवपुरं विप्र समानीतः ससंभ्रमः। पापस्थितः स्वयं देवा लिंगमूर्तिर्महेश्व
रः॥ अर्च्यते ब्रह्मविष्णुविंद्रैः सुरासुरगुरुर्हरः॥ यस्मादस्मिन्ह्यलिंगये याति विश्वामतश्च
राचरं। तेन लिंगमिति प्रोक्तं। पुराणज्ञैर्महात्मभिः॥ तेन देवगणाः सर्वे संक्षिता मा-

यया पुरा॥ प्रलीना स्त्रैव लोकास्तेन दृश्यांत द्विमो पतं। पुनर्दृश्या नविष्यंति स्तुदपमा
नाः स्वयंभुव॥ साहं लिंगार्चनपरा नर्मदा नाम नामतः॥ कालयुगसहस्रं तु रुद्रस्य प
रिचारिका। अस्य प्रसादादमरा तु ह्यहं मुनिपुंगव॥ सत्याडीवसमायुक्तः। सिद्धासि
वं शिवार्चनात्। पूजितः संस्तुता वापि सेस्य तावामहा मुने। किं न दद्यान्महेशानः
प्रार्थिता लिंगमूर्त्तिमान्। एवमुक्त्वा तु मां देवी तत्रैवांतरधीयत॥ तां स्त्रियः सच देव
स्रो बकरूपा महेश्वरः। तस्यास्तद्वचनं श्रुत्वा अवतीर्य महानदी। स्नात्वा चास्य वि
तं राडनू। तल्लिंगं लक्षितं मया। तत्राहं सहसा तस्मात्समुत्तीर्य जिलाशयात्। न च
पश्यामि तल्लिंगं न च तां निम्नगां नृप। तत्रैव लोकाः संजाताः क्षितिस्त्रैव सकानना॥
सेंद्रचंद्रार्कमदितं समस्तं नलस्तले। यथा दृष्टं मया पूर्वं त्रैलोक्यं तत्तथाभवत्।
ततोहं मनसा देवं पूजयित्वा महेश्वरं। नर्मदातीरमाश्रित्य तपस्तेपे ततः स्थितः॥

एवं वाक्य पुरा कल्पे मया दृष्टं यमच्युता। नर्मदा मर्त्यलोकस्य सर्वपातकनाशिनी
। तस्माद्धर्मपरैर्विप्रैः सेव्या क्षत्रविशादिभिः॥ सदा सेव्या महाभागा धर्मवृद्धिमभी-
प्सुभिः॥ ये पिबंत्यंभसस्तोयं नर्मदाया महेश्वरं। स्नात्वा चार्चयंति सर्वे प्रयांति शिव
मंदिरं॥ इति श्री नर्मदामाहात्म्ये बककल्पसमुद्भवो नाम॥ ९॥ श्रीमार्कंडेय उ
वाच॥ ॥छ॥ पुनर्युगांतमन्यत्तु संप्रवक्ष्यामि तच्छृणु॥ सप्तघोरा दीपितविश्वेस्त्वा
वरजंगमं पुरा। सरित्सरः समुद्रेषु शुष्कं यं यातेषु सर्वशः॥ स्वाहा स्वधावषट्कार
नष्टे धर्मे च पार्थिव॥ नानारूपधरैर्मेघैर्विंद्युदायुधसमन्वितैः॥ सर्वमापूरितं व्योम
वार्षिधिः सातरास्तदा॥ ततस्तु कार्मवी भूतं सर्वतः सलिलावृता। जगन्नवा
दरादेवः सुष्वाप भगवान्हरः॥ एकतिंस्त्वा मवष्टभ्य योगात्मा स प्रजापतिः॥ श
तयुगसहस्रांतं कालमाविष्य सोस्विवं। ततस्तसंशायारूढा ब्रह्मलोकनिवा-

सिनः॥ स्तुवादिऋषयः सर्वे ये चान्ये सनकादयः॥ पर्यंके विमले शुभ्रे नानास्त
रणसंवृते॥ शयानं देवदेवेशं स्वपत्नीकेशवपधड़े॥ विश्वरूपा च सा नारी विश्वरूपयाम
द्वेश्वरः॥ गाढमालिंग्य सुप्तौ तौ ददृशुर्मुनिसत्तमाः॥ पादमूले ततस्तस्य स्थिता मां पद्मद
लेक्षणां॥ कंन्यां पश्यंति सुश्रोणीं चरणौ तस्य मृद्नतीं॥ विमलांबरसंवीतां नागयज्ञोप
वीतिनीं॥ तेजोलंकृतसर्वांगी सर्वाभरणभूषितां॥ कालं युगसहस्रं विपादमूलमु-
पस्थितां॥ प्रसुप्तं देवदेवेशमुपास्ते वरवर्णिनी॥ अथ ब्रह्मा समायुक्तो लब्ध्वा द्वैर्मा
नसैः सुतैः॥ स्तोति शंकरमत्यग्रा लक्ष्म्या परमया युतः॥ स्तुवतस्तस्य देवेशं मेत्रैरी
श्वरसंश्रितैः॥ अकस्मात्तत्र ते वेदाः प्रलीनास्तमहार्णवे॥ वेदैः प्रलीनैस्तैर्भगवान्
ज्ञानतमसावृतः॥ प्रसुप्तं देवमीशानं बोधयन् समुपस्थितः॥ श्रीब्रह्मा॥ उत्तिष्ठ देव
पिंगाक्ष महादेव महेश्वर। मम वेदा हृताः सर्वे वामतस्तात उमुष्यतः॥ वेदैर्यास्तिं

२३

गत्सर्वं विश्वं वेदाद्भूतं विलो॥ अतीतानागतं सर्वं वेदैः स्मरामिस्त जाम्यहं॥ तैर्विनाहं
समनवं॥ मूकोंधजडद्भवसदा॥ यज्ञो भोगानि वीयंते विना न प्रजायते॥ तस्मा
द्वेदान्महादेव शीघ्रं मदाउमर्हसि॥ जडांधबधिरत्वं च तैर्विना न प्रयाति मे॥ स्वा
नानिद्रा च चारिकथं सद्व्याम शंकर॥ सांप्रतं स्वल्पवीर्यं चाद्वेदहीनः परंतप
॥ तावच्छास्त्राणि राजंते समस्तानि जगद्गुरो॥ यावद्वेदादधिरयं नापतिष्ठस्सना
तनः॥ यथा दितनस्तृणीनाश्रोयत्यतितमः हृत्यं॥ एवं समस्तपापानि यांति वेदस्य
श्रवणात्॥ वेदैरहमडंस्ये यत्न ब्रह्मसनातनं॥ हृदिस्थं तव ज्ञानाप्निगतं तद्वे
दवर्जितं॥ वेदान्मुक्त्वान्यशास्त्राणि यधीयंते द्विजातयः॥ तत्प्रोक्तं च धर्मस्य शि-
थिलत्वाय कल्पते॥ अरुचावृत्वसंस्पर्शं यधीयंते द्विजातयः॥ तथा वेदाः द्वैरं-
ती कृतयेवानारूताःअतः॥ तथा वेदान्वद्यायाच्योन्यत्रकुरुतेश्रमं॥ धर्मद्वि

रतितस्यापि लिङ्गस्तां ब्रह्मदिवादके। वेदानुच्चरतो मह्यं देवदेवस्य चाग्रतः॥ अकस्मान्न
गता वेदाः कथं ब्रह्मन्स्याज्जगत्स्थितिः। तस्य नष्टा महादेव प्रविष्टास्तु महार्णवे। तान्नु समानी
याद्देवशोकार्णवाद्धातुमर्हसि। दुःखितं यं विशालाक्षी सर्वज्ञानानि तत्त्वतः। जाग्रती यु
गमाद्यस्त्वं नान्या काचिदिहेदृशी॥ कविश्चायं महाभागो मार्कंडो धीमतां वरः॥ कल्पेक
ल्पे महादनक्कस्त्वामयं पर्युपस्थितः॥ जगत्त्रयहितार्थाय चर तद्व्रतमुत्तमं। एवमुक्तस्तु
देवेशो ब्रह्मणा परमेष्ठिना। उवाच श्लक्ष्णया वाचा नर्मदां सरितां तदा। कथयस्व म
हाभाग ब्रह्मणः परिपृच्छतः॥ केन वेदा हृता देवि जगतां स्युः पवित्रकाः॥ एवमुक्ता तु
रुद्रेणाबला पद्मगलोचना॥ नर्मदोवाच॥ ॥ब्रह्मणो जपतो वेदान् त्वयि सुप्ते महे
सुरे। लवतश्छिद्रमासाद्य घोरेस्मिन्सलिलावृते। पूर्वकल्पसमुद्भूतो बलवंतो मुद्र
ड्रायो॥ हृष्टोतदा महादेव लवदुत्पादितो ह्वरा। राजा जिर महावीर्यो दानवो मधुके

टभौ॥ तौ वायुभूतौ सूक्ष्मौ च पश्यतोस्मात्पितामहात्॥ हृत्वाश्रुतं ततो वेदान् प्रविष्टौ तौ
महार्णवं॥ एतच्छ्रुत्वा महादेवो नर्मदाया वचस्तदा॥ सस्मार देवदेवेशो शंखचक्रगदाध
रं॥ अथ तत्रागते विष्णौ प्रोवाचेदमुमापतिः॥ वेदानुद्धर गोविंद पाताले दानवाहृतान्॥ अं
तरेण विधिर्वेदहीनं धोमूको जडो भवत्॥ स रुद्रवचनाद्देवस्तथेति प्रणयान्वितः॥ प्रविवे
श महाराजन्मृतछं कमलापतिः॥ दानवांतकरो देवः॥ सर्वदेवैः प्रपूजितः॥ मीनरूप
धरो भूत्वा क्षोभयानो। महाराजन्मृतजं कमलापतिः॥ दानवांतकरो देवः सर्वदेवैः प्रपू
जितः॥ मीनरूपधरो भूत्वा क्षोभयानो महार्णवं॥ वेदान्स ददृशे तत्र पाताले निहिता
न्प्रभुः॥ तौ च दैत्यौ महावीर्यौ दृष्टवान्मधुसूदनः॥ ततो वेगान्महाबाहुः सूदयामास तौ
तदा॥ वेदांस्तथैव तोयस्थान्नानयित्वा जगद्गुरुः॥ चतुर्वक्त्राय देवेशः प्रादाच्चक्रगदाधरः
॥ ततः प्रहृष्टो भगवान्वेदान्लब्ध्वा पितामहः॥ जनयामास निखिलं जगत्स्थावरं

॥सा च देवनदी पुण्या रुद्रस्य परिचारिका॥पावनी सर्वभूतानां प्रवाहसलिलंप्रदा॥त
स्यास्तीरे ततो देवा ऋषयश्च तपोधनाः॥अजपं खंबकं देवं प्रहृष्टेनांतरात्मना॥एका-
मूर्तिर्महेशस्य कारणांतरमागता॥त्रैगुण्यं पंकुरुते कर्म ब्रह्मविष्णुशिवात्मिका॥एते-
षां पृथक्‌भावं ये॥कुर्वंति विमोहिताः॥ते षां धर्मः कृतः सिद्धिं जयिते पापकर्मणां
॥एवमेतां महानद्यस्ति स्नेरुद्रसमुद्भवा॥एकापि च त्रिधाभूता गंगा रेवा सरस्वती॥गं-
गा वैष्णवी मुक्तिः॥सर्वपापप्रणाशिनी॥रुद्रदेहसमुद्भूता नर्मदा पुण्यवर्द्धिनी॥ब्राह्मी
सरस्वती प्रोक्ता स्वर्गलोकप्रदायिनी॥न मह्या परमा काचिन्मूर्तिः शिवकलात्मिका॥
दिव्या कामगमा देवी सुरसिद्धर्षिपूजिता॥व्यापिनी सर्वभूतानां॥संसारार्णवतारि-
णी॥तस्या जलं ये हि पिबंति लोकाः सर्वत्र पापाश्च विमुक्तशोकाः॥व्रजंति संसार
विडंबनं ते सत्क्वा चिरं मोक्षपदं विशुद्धं॥यथा गंगा तथा

गा तथा रेवा तथा देवी सरस्वती॥समं पुण्यफलं प्रोक्तं स्नानदर्शनचिंतनैः॥सप्त
कल्पस्मरा यस्मात्तस्मादधिक्यमागता॥अमृता इति मंत्राच्च स्वयतामाहु चिंतकैः
॥मुच्यंते दर्शनात्तस्या मनुष्याः पापसंचयैः॥नर्मदायां नरश्रेष्ठ ये ऽर्चयंति त्रिलो-
चनं॥ते रुद्रलोकमासाद्य तिष्ठंति सुखसंस्थिताः॥इयं तु ह्यंगसंभूता महापुण्या म-
हानदी लोकान् व्याप्य तस्थुर्गते नष्टपापत्वमागता॥य एवमीशान वरस्य लिंगं प्रवृ-
द्धायत्युपजलाप्लुतांगः॥स याति रुद्रं स्वर्वैडिसत्वाखवाप्समादाद्दूपचीयमानः
॥इति श्रीवायुप्रोक्ते रुद्रसंहितायां नर्मदामाहात्म्ये मात्स्यकल्पः॥छ॥१०॥युधिष्ठिर
उवाच॥ ॥कस्मिन्कल्पे महाभागा नर्मदेयं द्विजोत्तम॥विनष्टा ऋषिभिः सर्वैः
प्रवीतैर्महात्मभिः॥एतदिच्छाम्यहं सर्वं ब्रूहि मां वदतां वर॥कल्पांते यद्भवत्कष्टं ला
कानां तत्क्षमेव च॥अतीते तत्र वाराकल्पे यश्चायं वर्णितः नृप॥अस्मिन्नाम सा च कल्पस्य॥

ममाचक्ष्वां वदप्रभो॥ एवं पृष्टः स नामध्यमा मार्कंडो धीमतां वरः॥ उवाच स्वायतां सर्वै-
॥ कथ्यंयं पापनाशिनी॥ महत्कथ्यं विशिष्टं कल्पादस्मात्परं तथा॥ लोकक्षयकर
घोरश्चासीत्कालः सुदारुणः॥ तस्मिन्नपि महाघोरे यथायं नमृतास्मि तु। परत्रचेष्टि-
विलक्षाचस्त्रागुध्रुतं कथयामि मां। संक्षयः सर्वसत्वानां अस्तवह्वमेद्वुर्ग्रमः॥ युगांतस-
मनुप्राप्ते पितामहदिनक्षये। मानसा ब्रह्मणः पुत्राः सनकाद्युभवसत्तमाः॥ स-
नकाद्या महात्मानो ये च विमानिकागणाः। यामंडवरुणाद्याश्च लोकपाला दिन-
क्षये। कालापेक्षास्तु तिष्ठंति लोकवृत्तांतनतत्पराः। ततः कल्पक्षयेप्राप्ते। तेषां
ज्ञानमनुत्तमं। सार्वेषां नश्यते तत्र युगकल्पानुसारतः॥ स्वर्लोकं तु परित्यज्य भुवर्लो-
कं ब्रजंतिच। स्वर्लोकं च महश्चैव। जनश्चैव तपस्तथा। अयंति सत्यलोकं च सर्वलो-
केष्वनुत्तमं। कालं युगसहस्रांतं पुत्रपौत्रसमन्वितः। सत्यलोके वतिष्ठंति यावत्सं-

२६

प्लवते जगत॥ ब्रह्मपुत्राश्च ये केचित्कल्पादौ नभवंत्यथ॥ त्रैलोक्यं तु परित्यज्य
अनाधारं विनश्वरं। तैः सार्द्धं येत्र नप्राप्ता नागाः क्रूरमहाग्रहाः॥ यक्षराक्षःपिशा-
चाश्च अन्ये विमानिकागणाः॥ ऋषयश्च महानागा वसुभिश्चान्ये पृथग्विधाः॥ पृथि-
व्यामस्मी दंति ये चान्ये तलवासिनः॥ अनावृष्टिरभूत्तत्र महती शतवार्षिकी॥ लोक-
क्षयकरी घोरा दृष्टौषधिविनाशिनी। त्रैलोक्यसंहारकरी सप्तलोकावशोषणी॥
तता लोकाः क्षुधाक्रांता विभ्रमंति दिशो दश। कंदैर्मूलैः फलैर्वापि कंचित्कालं निवर्त्त-
काः॥ सरितः सागरान् कूपांस्तथा वै पर्वतानपि। तत्रापि सर्वे विशुष्यंति सरितो द्विजिः सहस्रा-
गराः। नतोयान्यल्पसाराणि सत्वानि पृथिवीतले। तान्यवाग्रप्रलीयंते विना जलसमा-
श्रयात्॥ अथ संक्षीयमाणासु सरित्सु सहसागरैः। षष्टिर्मुनिसहस्राणि ऊर्द्धरेतनिवा-
सिनः। ये च विधानसाविघादं लोल्वखलिनस्तथा॥ गुहासु च हिमाद्रिविंध्यवसंतितपोध-

नाः। सर्वे तमामुपागम्य तृषार्त्ताः क्षुत्प्रपीडिताः॥ ऊचुः प्रांजलयः सर्वे भीदयामो महा
मुने समस्तसागर शैलांतां मही शुष्का हि द्विजोत्तम। कथं वयं तत्र यास्यामो यावत्कल्प वि
पर्ययः। दीर्घायुरसि विप्रेंद्र न मृतस्त्वं जगत्क्षये। त्वतेन चोक्त विप्राश्च सर्वे तत्र हृदि
स्थिताः तस्माज्ज्ञानासि सर्वं त्वं ब्रूहि दिति प्रवदितं द्विज॥ अनावृष्टिहते सर्वे सीदाते सचरा
चरं। पवित्रा हि महाभागा नर्मदा प्रथनसंक्षयं॥ ततः संचिंत्य मनसा तान्विप्रानिदमब्र
वं॥ अस्मिंश्चैत्रं पश्चिमे अपुत्र दारसमन्विता॥ अत्र क्रादीची दिशं प्राप्य याम्यां याम्यम
सत्तमाः॥ नगरग्रामसहितां पुरपत्तनशोभितां। ब्रजामो नर्मदां स्थमिंबह्वसिद्ध नि
षेवितां। देवीं रुद्रनदीं पुण्यां सर्वपापप्रमोचनीं। यस्या मस्तां महाभागां बहुपुण्य
फलावृतां॥ नानाविहंगसंघुष्टां ऋषिकोटिनिषेवितां। मार्द्यैर्लोगवतेः सांख्यैः
सिद्धैः समाकुलां। अनावृष्टिहता क्षीणाः कंयादलगारपि। आश्रयिष्यामोऽस्य

२१

व

त्रनिवस्यामाय तत्र ताः॥ एवमुक्तास्तु ते सर्वे समेत्यानुचरैः सह॥ नर्मदातीरमाश्रा
श्रित्य स्थितास्तत्रैव निर्णयाः। किंचित्पूर्वमनुस्मृत्य पुराकल्पादिजं भयं। यथा तत्र न
र्मदातीरमासाद्य वकलोयुगे। नाना वर्षशतं पूर्णं दिव्यं तत्र निवासिनो। षड्विंशत्तु
सहस्राणि मानुषाब्दानि संख्यया। तत्राश्चर्यं मया दृष्टं ऋषीणां विमतं नृप। अनावृ
ष्टिहते लोके नष्टे स्थावरजंगमे। छिन्नचारित्रमर्यादे हाहाभूते द्विजेतमि॥ चातु
र्वर्ण्ये पलीने च नष्टे स्वाम क्रियाविधौ। निःस्वाध्याय वषट्कारे ग्यो चाचार विवर्जि
ते। इयमेका सरित्श्रेष्ठा। ऋषिसंघनिषेविता। नान्या काचित्त्रिलोके च सुहृत्स्यात धर्म
मनंदना। तस्येव पुण्यतीर्थेषु। सिंद्राप्येवामरावती॥ देवतायतनैः शुभ्रैराश्रमैश्च
सुकल्पितैः॥ शोभिते नर्मदा देवी स्वर्गमंदाकिनी यथा। तरंगकर विक्षेपा फेनपुं
जाट्टहासिनी। शाक्रां तरुलता चाला पापदुर्गति नाशिनी। कूलयान्दनाद्यास्तावत्तुं

डितायतनैः स्थलैः। ब्रह्मयज्ञैरग्निहोत्रैश्च हविर्धूमसमाकुला। शालालंकृतनर्मदावती
। वृद्धद्वीपस्तनीस्थला। वृहत्कूलाद्रिजघना। खलत्क्रतु[illegible]मेखला। धूमाचितनगादे
वीशवत्कालवराववरी। आनंदकाद्वायतनैः प्रजासंस्कारशालिता। ज्ञाडातसरितं
श्रेष्ठाश्रुयासर्वार्थिसाधनी। कचित्तपश्चतपास्तत्र। कचिदप्यग्निहोत्रिणः॥ कचिद्ब्रह्मीभुवा
ताश्रास्तपस्फाग्रव्यवस्थिताः। आत्मयज्ञकाराः कचित्परपर्याजिनः॥ विसन्नवाङ्गानिनः
कचिदपरशिवतत्पराः॥ एकरात्रं द्विरात्रं द्वित्रं कचित्तु षट्रात्रलोडनाः। चांडायया
परस्थान्येरुाह। कचिद्व्यवस्थिताः। अम्भकुद्यस्तथाचान्यदंतोलूखलिनः परा। प्र
ह्यालाः पाणिपात्राश्च अम्भचूर्णाशनाः परा॥ एवंविधैस्तापनिष्ठैर्नर्मदाशोभितान्नृप।
जपद्भिः शंकरं देवं केशवं च निरंजनं। एकत्वेन पृथक्त्वेन च यजंत ऋषिसत्तमाः। क
लौयुगे महाघोरे श्रान्नाम्लेसिद्धिमुत्तमां॥ यस्ययस्य ह्रियात्तक्तिविज्ञानंतस्यतादृशं। य

स्ययस्यह्रियावांछातांतामीप्साद्ददात्तप्रभुः॥ संसारपरिखिन्नीते ये पृथकलाडिनोन
रा॥ ये महाद्वहत्वमीशानं यत्काशावलंबिमः॥ पुनरावर्त्तमानास्तु जायंते पशुपक्षि
णः॥ जन्मनि विविधकर्मान्मातदुःखभागिनः। पुनर्जन्मे पुनः स्वर्गे पुनर्घोरे च रौरव
॥ संचरंति महाराज पूर्वपापफलं न ते॥ ये पुनर्देवमीशानं सकलावानुसंश्रिताः। य
जंति नर्मदातीरे न पुनः संसरंति ते॥ आदह्य पतनात्किंचिदुपासंतः परंगताः॥ कचि
द्वादशाब्दिवर्षैः पा[illegible]रन्ये तपोधनाः। त्रिभिः संवत्सरैरन्ये चान्ये संवत्सरेण वा। ष
ड्भिर्मासैस्तु संसिद्धास्त्रिभिर्मासैस्तथापरे। मुनयो देवमाश्रित्य नर्मदां च यशस्विनीं।
छित्वा संसारबंधं च मतास्ते ब्रह्मशाश्वतं। एवं कलियुगे घोरे शतशोथ सहस्रशः। नर्म
दातीरमाश्रित्य मुनयो मोक्षमागताः॥ ये नर्मदातीरमुपेत्य लब्ध्वा लोकं व्रतं यत्नपराः प्र
पन्नाः। त्रिकालमंतः प्रविगाह्य मन्त्री देवं समभ्यर्च्य शिवं व्रजंति। धनार्चने जाप्यम

ह्यामविश्वना॥ ...गांवासनतंस्मरंति॥ तक्षीणपापाइवराजहंसाः संसारवार्धिंप्रतरंतिपा-
रं॥ सत्यंसत्यंपुनःसत्यंमह्योकंडेनभाषितं॥ नहिवेदात्परंशास्त्रंनदेवःकेशवात्परः॥
आलोड्यसर्वशास्त्राणिविचार्यचपुनःपुनः॥ इदमेवमुनिःप्रत्नंध्येयोनारायणःसदा॥
एतदेवमहाराजसर्वविद्यासुसंमतं॥ अर्चनीयोमहादेवोध्येयोनारायणःसदा॥ स-
विद्यायाहरिंस्तौतिहरार्चनविशारदः॥ सहिद्यांतांविजानीयात्नान्याविद्यामताम-
म॥ हरेरपिहरस्यापिनलादास्तियथान्तरं॥ गंगायानर्मदायाश्चनूनंनास्तियथांतरं॥ हरिं
स्तौतिहरंद्वेष्टिहरंद्वेष्टिहरार्चकः॥ यःसपापसमाचारः॥ पापात्मानारकीध्रुवं॥ या-
वाद्धरंनभजयतियतात्मा॥ रेवांसमाश्रित्यमहानुभावः॥ सविक्षवांत्राघलावलिनार्कीं
वर्षाद्विमासार्द्धदिनैरपीह॥ कीटाःपतंगाश्चपिपीलकाश्चकदापिरेवांतमियम्रि-
यंते॥ तेदिव्यरूपाःसुकुलप्रसूताःस्नातंममाधर्मपराभवंति॥ कालेनहृद्धाःप्रपतंतियपि

महांतरंगौघनिरस्तमूलाः॥ तेनर्मदासंगविमुक्तपापाजाह्नव्यमानास्त्रिदिवंव्रजंति॥ अका-
मतःकामतएवराजन्रेवांसमाश्रित्यदिवेमृयंते॥ जडांधमूकास्त्रिदिवंप्रयांतिकिमत्रविप्रा-
स्नवनावयुक्ता॥ मासोपवासैरपिशोषितांगानतांगतिंयांतिविमुक्तदेहाः॥ यांयांतिरेवाजल-
पूतकायाःशिवार्चकाःकेशवभक्तियुक्ताः॥ येनर्मदातीरमवाप्यकाममभ्यर्चयंतीहशिवंत्रि-
यांच॥ नारायणंवामनसासुपूताः॥ पिबंतिमातुर्नपुनस्तवांनः॥ वसंतियेतीरमुपेत्यदेव्या-
स्त्रिकालदेवार्चनसत्यपूः॥ विण्मूत्रचर्मास्थिशिरोपधानाःकुक्षौसुवत्यानपुनर्विशंति॥ किं
यज्ञदानैर्बहुभिश्चवेदैःनिषेवितैस्तीर्थवरैःसमस्तैः॥ रेवातटंदक्षिणमुत्तरंवासेवंतितेरुद्रच-
राभवंति॥ तेवंचिताःपंगुजडांधभूतालोकेमनुष्याःपशुभिर्द्वितुल्याः॥ येनाश्रितारुद्रतनुप्रसू-
तासोपानपंक्तिस्त्रिदिवस्यरेवा॥ कलौयुगंघोरमिदंयदुक्तंदुष्टंकदाचिन्नपुनर्द्विजेंद्रः॥ सनर्मदाती-

रमुपेत्य शार्वमभ्यर्चतां सर्वविमुक्तसंगः॥ विघ्नैरनेकैरनियोज्यमावा मुंचंति तीरं न हि नर्मदाया
॥ मत्या हि विश्वस्य तु तीर्थभूता बंद्याश्च ते सर्वजनस्य मान्याः॥ भवंति मृत्युत्रिव मिष्टमुख्याम
हामुनीशा हृतपापसंघाः॥ सिद्धिं परां देवि जलाक्ततांगा ब्राह्मं परं पारमनुप्रपन्नाः॥ ज्ञानं मह
त्स्तुष्यतमं पवित्रं पठंति ये नित्यविशुद्धसत्वाः॥ गतिं पुरां यांति महानुभावा वाक्यं हि रुद्रस्य यतः
प्रमाणं॥ ११ ॥ इति श्रीनर्मदामाहात्म्ये॥ युधिष्ठिर उ०॥ अहो महत्स्तुष्यतमा वरिष्ठा हृद्यं न याता
हृद्यया युगांतेन॥ पप्मात्सदा मेव्यतमा मुनींद्रैर्ध्यानार्चनस्नानपरैर्नरेंद्रैः॥ ये त्वयोक्तास्तु नियमास्त
षीणां वेदनिर्मिताः॥ मोक्षवाभिर्न वेद्येषां नियमैस्तु दृश्यग्विधैः॥ दत्ताद्दत्तान्निर्वापि पिषद्दूरशानि
रेव च॥ स्तुच्यंते ते कथं घोराद्वीश्वरार्चनतत्पराः॥ ब्रह्माणं वा सुरश्रेष्ठं केशवं वा जगद्गुरुं॥ मंत्राय॥
सर्वथा जातो ह्यस्मिन्प्रश्ने हि जोत्तमा॥ एतद्विस्तरतः सर्वं कथयस्व ममानघ॥ अस्मिन्संसार

गहने तिमग्नाः सर्वजंतवः॥ ते कथं त्रिदिवं यांति॥ इति मे संशयो महान्॥ मार्कंडेय उ०॥ शृणु रा
जन्परं गोप्यं यन्न चोक्तं मया क्वचित्॥ संसारावर्तगहने जंतूनां जन्मकोटिषु॥ मानुष्यं दुर्लभं तता
तत्राप्युत्तमजन्म च॥ धर्मबुद्धिः सतां संगः श्रद्धा चापि सुदुर्लभा॥ भक्तिरुत्पद्यते नाग्यात्क
थंचिदपि शंकरे॥ तीर्थदानोपवासेषु यज्ञे देवद्विजार्चने॥ अवाप्तिर्ज्ञायते पुंसां श्रद्धया परया नृ
प॥ तस्माच्छ्रद्धा सदा धार्या मानसे मानवैः शुभाः॥ ईशोपि श्रद्धया साध्यस्तेन श्रद्धा विशिष्यते॥ अ
न्यथा निःफलं सर्वं श्रद्धाहीनं हि सारत॥ भक्तिः श्रद्धा वासना च तिस्र एकार्थलक्षणाः॥ तस्मात्ताम
श्रयेद्भक्तिं रुद्रस्य परमेष्ठिनः॥ तेषां हि सफलं जन्म येषां भक्तिः सुनिश्चला॥ सा चापि त्रिविधा भ
क्तिः सात्विकी राजसी तथा॥ तामसी सर्वलोकस्य त्रिविधं सफलं लभेत्॥ ते कर्मफलसंयो
गाद्दावर्तंते पुनः पुनः॥ जन्मांतरशतैस्तेषां ज्ञानिनां देवयाजिनां॥ मूर्त्तित्रये न वै भक्तिः स्या

त्यापस्यकर्मणः॥ नकिंचिन्नाप्यसर्वज्ञोमोक्षायाधोक्षजेनृप॥ कर्मकांडफलावाप्त्यैनकिं-
स्यादिधसेश्वसा॥ येतुनर्नर्मदातीरमाश्रिताद्विजसत्तमाः॥ त्रयीमार्गमतीक्रम्यतेयांतिप-
रमांगतिं॥ एकाग्रमनसोयेतुओंकारंशिवमव्ययं॥ अर्चयंतीहनिरताः॥ क्षिप्रंतिसिद्धिंनाज-
माः॥ कालेनमहताऽमीद्विजायंते॥ अन्यत्रदेहिनां॥ नर्मदायाःपुनः॥ स्तीरेक्षिप्रंसिद्धिरवाप्यते॥ सिद्ध्यं-
तेवत्सरैःषड्भिर्मासैस्तुसांख्यविदोजनाः॥ वेदवेदांगसंपन्नास्तेपिसिद्धिंतिचार्हताः॥ सर्वयोग-
विदःसंतःसमुद्रमिवसिंधवः॥ एकांतंतेतिकल्याणंतेयोगेमाहेश्वरेरताः॥ सर्वेषामेवयो-
गानांयोगोमाहेश्वरोवरः॥ तमासाद्यविमुच्यंतेयेपिस्युःपापयोनयः॥ निर्विकल्पंशिवं
ध्यात्वाजायतेनहियोनिषु॥ गतिरेषादुरारोहासर्वपापक्षयंकरी॥ क्षिप्रंमुच्यंतिसंसारा-
द्देवमाश्रित्यजंतवः॥ तस्मात्स्नानपरोविप्रोनित्यंभस्मविलेपनः॥ नर्मदातीरमासाद्यक्षि-

प्रंसिद्धिमवाप्नुयात्॥ अर्चयंतित्रिकालंतुयेनराःलिंगमैश्वरं॥ सर्वपापविनिर्मुक्तास्तेयांतिपरमांग-
तिं॥ षड्भिर्मासैस्तुसिद्ध्यंतियेमूढापापजंतवः॥ येपुनःशुद्धमनसोमासेसिद्ध्यंतितेत्रिभिः॥ यथादिनक-
रस्पृष्टोहिमराशिर्विलीयते॥ तद्वद्विलीयतेपापंस्पृष्टंभस्मकणैःशुभैः॥ सद्योजातादिसूक्तेनभस्मना-
येसमुद्धिताः॥ सूर्यवह्निसंभ्राजंतिनराःरुद्रपरायणाः॥ वैनतेयभयत्रस्तायथानश्यंतिपन्नगाः॥ तद्वत्पा-
पानिनश्यंतिभस्मनाभ्यर्चितानितु॥ नर्मदातोयपूतेनभस्मनोद्धूलयंतिये॥ सद्यस्तेपापसंघातान्मु-
च्यंतेनात्रसंशयः॥ व्रतंपाशुपतंयुक्ताःयथोक्तंपालयंतिये॥ शूद्रान्नेनविहीनास्तुतेपियांतिपरांगतिं॥
अमृतंब्राह्मणस्यान्नंक्षत्रियान्नंपयःस्मृतं॥ वैश्यान्नमन्नमेवाहुःशूद्रान्नंरुधिरंस्मृतं॥ शूद्रान्नरससंपुष्टो
येम्रियंतेद्विजातयः तपोज्ञानविहीनास्तुकाकगृध्राभवंतिते॥ दुःकृतंहिमनुष्याणामन्नमाश्रित्यतिष्ठ-
ति॥ योहियस्यान्नमश्नातिसतस्याश्नातिकिल्बिषं॥ यातेधर्मविशेषेणवर्जयेन्नतुलौल्यमाश्रितः॥ नरकं

यात्यसंदिग्धमित्येवं शंकरोब्रवीत्॥ ईदृग्रूपास्तु ये विप्राः पाशुपत्यव्यवस्थिताः॥ ते महत्यापसं
घातं दहंत्येव न संशयः॥ विदंबेन च संयुक्ता लोलुपेन च पीडिता॥ असंख्या ह्यसंख्याह्य इत्येवं श्रुति
नोदना॥ यिन्नमात्रकृते दीषि रन्ये केश्चिच्च कर्मजैः॥ नष्टज्ञानाचलेपेन अदंकारेण चापरे॥ शांकरेपि
स्थिता धर्मेयस्मात्पर्थवहिःकृताः॥ क्लिश्यमानास्तु कालेन तेपियांति परां गतिं॥ श्रद्दधानाः पुरुषा
मूर्षादिन्नसमन्विताः॥ न सिद्ध्यंति दुरात्मानः कुहष्टांतार्थसंश्रिताः॥ महात्मानोपि तीर्थस्य शांकरव्रतमा
श्रिताः॥ वियोनिं यांत्यसंदिग्धं लोलुप्येन समन्विताः॥ न तीर्थेन च वेदैश्च दुःकृतं क्लिविलुप्यते॥ अज्ञाना
च्चप्रमादाच्च तं यापविनिश्यति॥ एवं कृत्वा तु विधिना वर्त्तितव्यं द्विजादिभिः॥ परं ब्रह्म जपन्निश्च स्नातव्यं
तमानसैः॥ उर्ध्वस्थितो विरूपाक्षं योधातेरुद्रमात्मनि॥ सद्यः संविद्धने साक्षात्यण्मासान्नंगवत्तितः॥ संदि
नांवापित्रीवा वैस्नवीमपि॥ यः पठेन्नर्मदातीरे शिवाग्रे सशिवात्मकः॥ आभूतसंप्लवं यावत् रुद्र

३२

लोके महीयते॥ संसारव्यसनं हात्तुं उनाप्रोक्तं तु नंदिना॥ देवर्षिसिद्धगंधर्वसमवाये शिवालये॥ नंदि
गीतामिमां राजन् शृणुष्वैकमनास्तु मां॥ स्वर्गमोक्षप्रदां पुण्यां संसारत्रयनाशिनीं॥ संसारगुरुकरगु
दांग्रविदहात्तुमार्याश्चि दिछ्छथ प्रतिपदं नवतापखिन्ना॥ नानाविधैर्निजकृतैर्बहुकर्मपाशैर्बद्धाः सुखाय श्र
णुतेकहितं मयोक्तं॥ ह्यक्रचक्रगतिमागमात्स्थायमयातनां॥ चेतः प्रचेतः न्नमय लोल्लुप्यत्यज विद्वपा॥
दीनानाथविशिष्टेभ्यो धनं सर्वं परित्यज्य॥ यदि संसारजलधेवक्षसि प्रेंषोलनातुरः॥ जन्मो हि नं मृतेस्त्र स्तत्र
स्तकामादिभिर्नरं॥ अस्त्रयोगप्रमादिभ्यः पिनाकीयाति पापिनं॥ माधेहि गर्वकी नाज्ञा हास्ययास्यसिपी
उयन्॥ प्राणिनं ज्ञायं ज्ञारणं तज्ञाविमरणं तव॥ कालः करालः कोबालः कोमृत्युः कोयमोधमः॥ शिवविं
ष्णुपुराणां हितराणां किंभयं न वान॥ नवमारार्चजंतूनां रेखातीरनिवासिनां॥ नर्गाश्च नग्नवांश्चैव नवज्जी
तिबिनेदिने॥ शिवंनजंतिवंध्योहि शिवस्तुहि शिवं यजंति शिवं नमवराकत्वं॥ ज्ञानं मोक्षं यदिछसि॥ एवंयं

चाननं शास्त्रं मंत्रं पंचाक्षरं जप ।। ध्येहि पंचात्मकं तत्त्वं पत्र पंचाननं परं । किं ते कर्म्मसृगैः शोच्योनानानाव
विप्रो पितैः यदि पंचाननः श्रीमान् सेव्यते सर्वथा शिवः । किं संसारमदोन्मत्तं हृदि तैरपि । यदि पंचान
नो देवो नाव गंधे पिसे चितो ।। रेसूट किं विषादेन प्राप्य कर्मं तदर्थनां ।। नवानी वट्टनं नीमंनजत्वं नय
नाम्नां ।। नर्मदा तीर्थनिलयं दुःखौघविलयंकरं । स्वर्गमोक्षप्रदं नंत्र जन्मभूदसूरेश्वरी नर्मदे शात्परो देवी
